श्रीगणेशायनमः॥अथहायनरत्नप्रारंभः॥ हरिः ॐ मू॥ गणाधिपंरामगुरोः पदाब्जंदामोदरास्यंपितरंचनत्वा॥प्राचीन पद्धतिंबल्लिभद्रनामाकरोतिसद्धायनरत्नसंज्ञं॥१॥भागीरथीतीरविराजमानेश्रीकान्यकुब्जेनगरेतिरम्ये॥अभूद्दुरहाज-महर्षिवंशेश्रीलालनामागणकोग्र्यधामा॥२॥तस्यात्मजाः पंचबभूवुरेषांश्रीदधिदासःप्रथमंबभूव॥अस्त्रेचयःश्रीपतिपद्धतीनांचरीकांग्यधाब्धिप्रयुगणस्यतुर्ये॥३॥तस्यात्मजुषुः खेटविचारदक्षः प्रख्यातकीर्तिर्जितारिपक्षः॥श्रीरंबमकर्णधनतः कनिष्ठोनारायणाख्याकरणेवरिष्ठः॥४॥न्यायेयः सुरराजपूजितनिभोवेदाननामाग्रणीर्मीमांसादिसमस्तशास्त्रकमलप्रोद्बोधनभास्करः॥श्रीमद्भूपतिरूदभूजितपदोभूदेवमूर्द्धामणिः॥श्रीमन्मिश्रमचंतुर्मुनः समभवत्तस्माद्बुधर्मविनू॥५॥तस्मात्सुधुः सकलशास्त्रकलावरिष्ठोदामोदरः समभवत्कविनांवरिष्ठः॥योभास्करादितिपतामहकर्मनुत्वरश्मिर्ध्यधान्निरूपमानुतिनांहिताय॥६॥दामोदरस्यतनयोजातोवत्सभट्टहरिरग्रजः॥ यत्प्रभट्टेणचकिंचित्प्रकाश्यतेतज्जकंगुरोः कृपया॥७॥ निबंधारचिताःपूर्वैः संहिताजातकादिषु॥ नहायनफलंतस्मान्निबंधंकुर्नुमुद्यतः॥८॥हिरण्यरत्नवस्त्रायैर्यस्यैषाधिरीमकसंमतं सारंसमरसिंहस्यक्रियतेवाधिकंफलं॥९॥ननुकिमभिधेयकमिदंशास्त्रंप्रयोजनंचकिं॥उक्तंचाचार्यैस्तान संबंधंभातुंश्रोताप्रवर्तते॥ ग्रंथादौतेनवक्तव्यः संबंधः सप्रयोजनइति॥१०॥ अन्यच्च॥ सर्वस्मिंश्चशास्त्रस्यकर्मणोधापिकस्यचित्॥यावत्प्रयोजनंनोक्तंतावत्तत्रेनगृह्यतेइति॥११॥ उच्यते॥ यत्रनाचार्येणपरस्याभाषणप्रयोजनं॥ज्योतिःशास्त्रैकदेशरूपंपार्थिकादिनानाविधफलादेशकंशास्त्रंनाजकशब्दवाच्यं॥तदनंनरभूपतेः समरसिंहादिभिरधीत्याकरणेः ब्राह्मणैः तदवशास्त्रंसंस्कृतशब्दोपनिबद्धंतदधीताजकशब्दवाच्यमेव॥अनएवेक्तंब्राह्मएवइत्यादयोयावंत्यः संज्ञाउपनिबद्धा॥ अथग्रहराशिरूपषोडशवर्गसहमसांगवर्षफलभावविचारदशाविभागगमनागमनायनैक्यभ्ररूपात्मकादिपदार्थाः प्रतिपाद्यत्वेनविषयभूताः एषांपदार्थानांतात्रिकग्रंथस्यचप्रतिपाद्यप्रतिपादकभावसंबंधः प्रयोजनंननुभूतभविष्यद्वर्तमानशुभाशुभफलकथनं॥उक्तंचनारदेनप्रयोजननुजगतः शुभाशुभनिरूपणमिति॥अन्यद्वशास्त्रेवर्षफलप्रश्नादिनिक्षासुरधीकारीसचब्राह्मणएवउक्तंचवसिष्ठेनअध्येतव्योब्राह्मणेरेवनस्माज्योतिःशास्त्रंपुण्य

मेवंरहस्यं एतद्ग्रंथाभ्यासाद्योनियस्मादर्थधर्ममोक्षमध्ययशब्देति ननुयवनाचार्यप्रणीतकुवलयादिपारसीग्रंथात्मकस्य
तान्त्रिकशास्त्रस्याध्ययनमेवतावदनभिज्ञजनमध्ययनंदूरापास्तमेव उक्तंचस्मृतौ नवदेवावनीभाषांग्रंथैः कंठगतैरपि
इति तन्मूलभूतत्वात्समरसिंहादिशास्त्रस्याप्यध्ययनमनुचितं मूलाग्रुध्यासर्वमग्रहुमितिन्यायात् अथाच्यतेयवनाचा
र्यस्याष्टादशसंहिताकर्तृत्वंपुराणगणितग्रंथात्तद्वचः प्रमाणमेव उक्तंचकश्यपेन सूर्यःपितामहोव्यासोमयुमिश्रोऽत्रिःपराश
रः कश्यपोनारदोगर्गोमरीचिर्मनुरंगिराः लोमशःपौलिशश्चैवच्यवनोयवनोभृगुः शौनकोष्टादशेत्येतेज्योतिः शास्त्रप्रव
र्तकाइति तथाचयवनाचार्यप्रणीतंसंस्कृतशब्दोपनिबद्धंज्ञानकशास्त्रंयवनानाकाव्यदृश्यते तथैवब्रह्मणः सकाशा
त्पारंपर्यवशेननान्त्रिककर्तृत्वमप्यस्मर्यते उक्तंचरामकेन ब्रह्मणागदितंभागौनोभानुनायवनायवत् यवनेनचयत्प्रो
क्तंतान्त्रिकंतत्प्रकाशितमिति अन्यपितान्त्रिकाचार्याउक्ताः रोडुरानंदवत्सयुते रामकश्चद्विद्धोमिथिषणाद्यः। दुर्बुद्धाचा
र्यदृष्टेनतान्त्रिकस्यप्रवर्तकाइति अत्रचस्यात्तिः शास्त्रफलं पुराणगणकैरादशाद्यत्फलंच्यते इतिमिद्धांतस्मरणात् तथाच
कृतपेतामहंशास्त्रंचतायाबादरायणं गार्गीयंहापुराणाकंसूर्यसंयंतान्त्रिककंकसाहिति जीर्णतान्त्रिकोक्तेः अथच मयाहि
यवनाख्येपुस्तकेशास्त्रमिदंफलंस्मि कृषिवर्तेपिपूज्यतेकिंपुनर्दैवविद्गनइति गर्गोक्तेश्चयवनज्योतिर्विद्यातात्पर्य
यवनाहिज्ञानानंदोपः अन्यथापंकोद्भवकमलादपीश्वरपूजादोषाभावःस्यात् तथाचुनंगफणायनिर्यद्गणेअनादरस्यात्तदुक्तं
चगणेशदैवज्ञैः ब्रह्मद्वेषीनुरक्तनिर्मितमिदंनार्तीयकंवर्तते शास्त्रंयद्यपिसहिंसेरपितथाप्यधेनुमहींभवेद्यस्मात्सदस
फलनिगदितंसत्यंहिकिंपंकजे शंखंपंकभवंतथारुणिफणीरत्नंमणोदूषणमिति हिरण्यनेनब्रह्मविष्णुरुद्रमुखनिर्गत
शापनयवनतात्रातेनश्रीसूर्यदोयवनशास्त्रप्रणयनानु द्विनामपिसूर्यसिद्धांतवदेतदध्ययनयुक्तमित्युक्तं कश्चा
विष्णुमुखनिर्गतशापात्म्लेच्छनाःधिगतमितिन्यमसंघः रामकेनपुरिलंध्यमशपेनहिधीमतिशिरनाधयनीयमिति पु
रिरोमकपत्तने यदानुजमर्यकेनचित्सुबुद्धिनासमरसिंहादिनाअधीतंतदीयज्योतिःशास्त्रेणदृष्टनरसंस्कारोदित्युक्तं
संज्ञापरिभाषणेसंस्कृतशब्देरूपनिबद्धंचत्र्यपने तदानकृपिदोषइतिनेयं नवदेवावनीभाषामेतद्वचनादुपवीयकाव्या

DR BHAU DAJI MEMORIAL

लंकारादिविषयामितिसिद्धांतः ननुसूर्यसिद्धांतादिग्रंथास्तुश्रौतस्मार्तकर्मविषयकाः कथमस्यतान्त्रिकशास्त्रस्यश्रौत
स्मार्तकर्मविषयत्वम् उच्यते अष्टवर्षब्रह्मणमुपनयेत् यद्यत्राप्रकामइतिनथा अष्टवर्षंभवेद्गौरीनववर्षाचरोहि
णी गौरींदद्यात्सुलोकंसाविंशेरोहिणींदद्यात्तादिभिर्वर्ष्यरूपनयनविवाहकालाअनेकेअभिमतासेषांज्ञानंझटितितान्त्रि
कशास्त्रादेवज्ञायतेइति अन्यच्च उक्तकालेपियुक्तंहिनायथोपनयनविवाहाद्युत्सर्गतीनभवनस्तथाजन्मकाला
त्तनहर्षेपिष्टसंभवोपीनभवतोदृष्टफलस्यतुल्यत्वादिति ननुसदसत्फलावबोधार्थंमस्यतान्त्रिकशास्त्रस्यग्रहणिसा
न्त्रिकशास्त्रेणकवर्षप्रवेशेजन्मकालाधीनत्वंसदसत्फलेकारणेचज्ञानंकशास्त्रादेवनृणांसदसत्फलबोधोभविष्यति किमनेन
तान्त्रिकशास्त्रेणअत्रोच्यते ज्ञानंकशास्त्रात्सदसत्फलज्ञानंचवक्ष्यायासस्यार्थंबहुकालसाध्यंचास्तिवाहि जन्मकाली
नस्यस्पष्टग्रहानंगीकृत्यदृष्टिपट्वर्थंस्पष्टकरणेसर्वग्रहाणामायुर्वर्षाणिचानीयतेतदशामंतर्दशांचनिर्णीयज्ञानक
शास्त्रादिनसदसत्फलंवाच्यं तत्रापिइष्टस्पष्टबलाश्रयगुणकानयनेसप्तदेवगणितस्यदशाप्रवेशेजन्मकालकलिजात
वत्सरेत्यादिगणितस्यचलनांसिद्धांतविद्यामेवनयादृशानांनादृशानां अन्यच्च एवमत्रायासेनानीतास्वस्वदशासफल
विवेकः कर्तुमशक्यः कथम् आयुःऋतंयेनहियन्तिदेवयादिनावाराहोक्तिग्रहायुर्वर्षाणांदशावार्षपंचदशावार्विंशति
वर्षेत्यादीनांबहूनांवर्षाणांसत्वान्नहुसंबंधिशुभाशुभदशाफलंनावतूकालमध्येनैकरूपंसंभवति अंतर्दशा
यामपिषड्वर्षाणांपंचकंषट्कंवाएकस्यसमायातिनवाप्येकरूपमंतर्दशाफलं विदशासूर्यदशाएकस्यचि
दल्पवर्षंकस्यचिद्दर्षंवसमायाति तथापिनैकरूपफलंनावदक्यः तस्माद्दशायासेनापिज्ञानंकसंस्थू
लकालकलदर्शनेतान्त्रिकेनुवर्षमध्येसर्वेषांग्रहाणांदशाः समायांति अत्रांतर्दशास्वल्पदिनाद्यासमायातिनवमा
सत्रयवेशदिनप्रवेशदशाफलमत्यंतसूक्ष्मतरंसमायायतः सदसत्फलज्ञानंतान्त्रिकशास्त्रादेवनिर्णीतंनांकेन उक्तंचसम
रसिंहेन त्रयोजनजातकफलेचिरत्रयोज्येमतिः स्फुरतिपुंसांतेनावहायनफलंप्रकाश्यंतान्त्रिकेप्रोक्तमिति ननुभा
वीनकर्मरूपस्यदैवस्यआवश्यंभावित्वात्कथमुशमोवर्षफलविचारस्य यदाहशौनकः येनयस्यामर्थेनस्यधि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ २॥

स्करेशसचिवोपि॥ यः साक्षान्नियतिः सोपिनशक्रोऽन्यथाकर्तुमितिनथाचदैवस्यबलत्वेपुरुषाकारोनिरर्थकइति अथाह किंच यदिदैवमेवफलेनदाकव्यायुपायेपुरुषाकारःकिंनिरर्थकोनस्यात्॥ अथश्रुतिस्मृत्यावेदितविधिनिषेधाश्चनिरर्थकाःस्युःतदाहकेशवार्कः फलेयदिप्राक्तनमेवकर्मकिंकव्यायुपायेपुरुषप्रयत्नः श्रुतिस्मृतिश्चापि नृणांनिषेधविध्यात्मकंकर्मणिकिंनिर्णिनुतः॥ अपिचानमानराशिनदैवमपिपुरुषाकारंविनाफलदंनहीति पुरुषार्थस्यैवमुख्यत्वं तथाचमनुराजन्॥ पूर्वजन्मजनितंपुराविदः कर्मदैवमितिसंप्रचक्षते उद्यमेननदुर्गतिर्नविद्यतेफलतिनैवकेवलमिति॥ अथपुरुषार्थस्यैवमुख्यत्वांगीकारे॥ अवश्यंभाविभावानांप्रतीकारोभवेद्यदि॥ नदादुःखैर्नबाध्यंतेनलरामयुधिष्ठिराः नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपि अवश्यमेवभोक्तव्यं कृतंकर्मशुभाशुभमित्यादिवाक्यानांकागतिरितिचेदुच्यते॥ अत्रकर्मणांवैचित्र्यंकानिचिद्दृढमूलानिकानिचिद्धिथिलमूलानि यत्रतन्मूलशक्तेर्नवर्षप्रभृतिभिर्दशाफलरूपेणप्रतिबंधकेनसंतानादिप्रतिबंधकेनसंतानविद्यायाबाधिर्णीतस्तत्रगृहशांत्यादिरूपेणपूर्णप्रयत्नेनापिसंतानादिप्रतिबंधकीभूतंदुरितंदृढमूलत्वान्निवारयितुंनशक्यते यत्रतुयद्दृढचारवंशेनगाढंचशरिरानंतानादिप्रतिबंधानिर्णीतः तच्छक्त्यैकेनलक्ष्यतेनादिनोपायं उत्कंचस्मृतौ हन्यतेदुर्बलंदैवपारुष्णविपश्चितेति एवंशुभमप्यसत्कंदशापाकेकालेक्रियमाणायाबाधिनायासेनफलसाधकाः अशक्तदशायांतानिदत्यतोअवश्यंन्यातिः शास्त्रगणनोपयोगः पूर्वोक्तशोनकादिवाक्यानिदृढमूलकर्मविषयकादिदैवपुरुषकारयोः साचिव्यमुक्तं योगायज्ञवल्क्येपि यथात्मेकेनचक्रेणरथस्यगतिर्भवेत् एवंपुरुषकारेणविनादैवंनसिध्यतीतिसंक्षेपः ज्योतिः शास्त्राध्ययनेफलमाहगोदयः एवंविधस्यश्रुतिनेत्रशास्त्रस्वरूपभर्तुः स्वसुदर्शनंवैनिहत्यशेषंकलुषंननानांषड्वर्गधर्मसुखास्पदंस्यादितिसूर्यसिद्धांतेपि दिव्यंचक्षुर्यहक्षीणांदर्शितंतानसुत्तमं विनाथाकीर्तिलोकेपुस्थानंप्राप्नोतिशाश्वतमिति ज्ञानविशेषणज्योतिर्विदांपूजनात्तरमयंजीर्णेरभ्यर्थाधिदृष्टिनष्टपापंहविसिद्धांतवेत्तानिजनिनशेषंतंचविद्धिनिश्चयेन करणभगणवत्ताहेयहोराबलाढ्यं जनयतिय

नमंहस्तनक्षत्रसूची नक्षत्रसूचीलक्षणंवराहसंहितायां अथविदिचैवयः शास्त्रंदैवज्ञलक्षणंप्रपद्यते सर्वज्ञिदृष्टकःपाशेज्ञयोनक्षत्रसूचकः तिथ्युत्पत्तिनजानंतियहाणांनैवसाधनं परवाक्यंनवर्तनेनैवनक्षत्रसूचकाइति आद्यैगणकानामपांक्तेयत्वं धर्मशास्त्रोक्तनक्षत्रसूचकाः भिन्नायेणतेयंउक्तंचयस्मिन् विस्फोधारंगमनंवक्रपूर्वाआद्यैसदाभूसुरैरदमध्ये नक्षत्रसूचीस्वलुपारूपेहेयःसदासर्वसुधर्मरूपेइति नन्वस्मिन्ग्रंथेग्रंथबाहुल्यमवर्यंदूषणमितिचेन्न यतोग्रंथसंक्षेपेअन्यथापक्षव्याविचारसंज्ञाश्चभवंति ग्रंथविस्तारेसंशयापक्षव्यारभावोभवति तस्माद्ग्रंथविस्तारोनदोषायेतिहेयः उक्तंचबादरेन संक्षेपसंज्ञायापक्षे श्रुतुःस्यानामसंज्ञयं वरीयाविस्तरस्तस्माद्दोषाय संज्ञायापहः इत्यत्तमतिप्रसंगेनप्रकृतंनावदनुसरामः अथराशिस्वरूपं उक्तंचमानतंत्रजिके फलंराशीयक्षाधीन्मू सर्वेषांप्राणिनांवतः अतोमेषादिराशीनांस्वरूपंप्राङ्निरूप्यते मेषवृषाथमिथुनः कर्कसिंहाथकन्यकातुलातावृश्चिकश्चधनुर्मकरएवच कुंभोमीनइतिप्राक्ताः बुधैर्दादशराशयः मेषाथमिथुनंसिंहसुलाधनुरथाघटः वित्तयाविबुधैरेतेक्रूराःषडपिराशयः वृषकर्कस्थाकन्याचवृश्चिकोमकरस्तथा मीनश्चैतेषडपिचवित्तेयाःसौम्यराशयः पुंसंज्ञाराशयःक्रूराः स्त्रीसंज्ञाःसौम्यराशयः मेषकर्कवृषतुलामकरश्चरराशयः वृषसिंहावृश्चिकोथकुंभाश्चस्थिरराशयः मिथुनःकन्याधनीमीनश्चद्विस्वभावकः मेषोथवृषभोसिंहः पगर्द्धधनुषस्तथा मकरश्चयुधैर्तेयाराशयोमीश्वनुक्ताः कर्कटोवृश्चिकश्चोभौबहुपादोदराकृतौ कुंभमीनावुभोज्ञेयौवित्तेयोपदवर्जिनौ मिथुनश्चतुलाकन्याधूवार्द्धौधनुषस्तथा राशयोद्विपदाज्ञेयाःयवनाचार्यसूरिभिः मेषश्चसिंहधनुषोविज्ञेयाश्चद्विराशयः वृषःकन्याथमकरः स्युरेतेजडराशयः तुलालीकुंभमीनाश्चविज्ञयाश्चद्विजातयः मेषोवृषोथमिथुनःसिंहःशेखान्वितोधनुः कर्कालिमीनाश्चबहुपत्न्यान्निर्मोक्षपटकाःस्मृताः मध्यणसिंहकन्याश्चतुलाश्चापाःव्यसूनयः रूक्षाःसिंहधनुर्मेषाः सीनाब्जाश्चित्रधानवः वृषकन्यामृगारूक्षाउष्णशीताश्चवातुलाः युग्मकुंभतुलाश्चाद्याः स्निग्धांगाःश्लेष्मधानवः नृपविट्शूद्रभूदेवास्तथापूर्वादिकादिशः मेषालिपश्चिमेनविज्ञेयाविबुधैःसदा वृषोदयाकर्कमृगधनुर्मि

षाद्यषाअमी शेषाः शीर्षोदयास्तेषा उभयश्चदशषः स्मृतः शीर्षोदयादिनबलाः शेषाराविबलाः स्मृताः राशेः स्वनंदभागो
यः सतुयर्गोत्तमाद्यदृति अथराशिवर्णानाहसमरसिंहः अरुण १ सित २ हरित ३ पाटल ४ धूसर ५ पांडु ६ रविविधाः
७ सित ८ हेमद्युति ९ पिंगा १० कर्बुर ११ बभ्रु १२ त्यादिवर्णाः स्युरिति मेषादिराशीनांसंज्ञानरमुक्तवाहरेण क्रिय१
नावुरि २ जिनुम ३ कुलीर ४ लयाः ५ पाथेय ६ नूक ७ कोर्पा ८ स्याः तौक्षिक ९ आकाकेरो १० हृद्रोग ११ श्रोत्र भे
१२ चेत्थं केंद्रादिमंज्ञाः उक्तासनेबकटकेंद्रचतुष्टयसंज्ञासप्तमलग्नचतुर्थदशमानामू संज्ञापरतः पणफर २८ ११
आपोक्लीमसंज्ञितंचन २९ १ १२ स्परनः यहाणांमूलत्रिकोणग्रहाणितेनेवाक्तानि सिंहे ५ रवि २ प्रथम १ षष्ठ ६
हयांग ९ तौलि ७ कुभास्त्रिकोणभवनानिभवंति सूर्यात् इतिराशिस्वरूपं अथराशिस्वरूपप्रयोजनं तत्रहिप-
दृचतुष्टदिनराविसंज्ञाराशिप्रयोजनं वक्ष्यमाणभावबलेतेयं पुंस्त्रिराशिप्रयोजनं पुंग्रहेद्याः पुंराशौस्त्रीग्रहा स्त्रीराशौग्रहीय
हाबलिनइतिः स्थानबलेतेयं पित्तोष्णशीलादिप्रयोजनं रोगकर्तायत्रराशावंशोस्यादनयोर्बलीतिधृष्टमभावे राग
स्थितिज्ञानार्थं राशिदिकूप्रयोजनं यात्रायांदिक्ज्ञानार्थं चरराश्यादिप्रयोजनंच रोदयेभोजनं मेकवारमित्यनेनभोजन
विचारणेज्ञेयं वन्ध्यादिराशिप्रयोजनमष्टमभागवेशिस्थिराशौवह्निभयमित्यादिस्थलेतेयं ब्राह्मणादिजातिकूरसोम्यत्वा
दिप्रयोजनं लग्नानुमानवशतोवयः प्राणंचज्ञातयोजनयाइत्यादिसमरसिंहाक्तेज्ञेयं यथा मम्मास्मिन्वर्षेकेनलाभा
भविष्यतीतिविचारलाभभावलग्नसमवर्णेनकूरसोम्यादिप्रकृतिसहितेननत्समसंज्ञानेनसत्समबहुलस्यकेनान्य
केननत्समवर्णादिवस्तुलाभोवाच्यः इतिराशिस्वरूपप्रयोजनं अथग्रहस्वरूपमुक्तंचपादवनरेविधिधृक्षिति
जोशुधयाक्ष्यति भृगुर्शीमीनीचनमः शिखिनोग्रहाः नवसदाश्रमणाद्गणेनृणां ददतिधान्य समंफलमुक्तवदति
थामनंनाथि ख्यादयोग्रहाः सप्तसदसत्फलदायकाः मुंथाफलविशेषस्यज्ञानार्थंराहुरष्टमइति ग्रहस्वरूपंचलोक्य
प्रकाशेभार्गवेंदोर्जलचरोज्ञजीवोग्रामचारिणो राहुक्षितिजमंदार्काः ध्रुवनृत्यशशिनः प्रभानामिदुजगुरुमध्यानेर
विभूमिजो अपराह्णेभार्गवेंदुसंध्यामंदभुजंगमो पित्तंप्रभाकरक्ष्माजोश्लेष्माभार्गवशीतगू क्षयुरुसमधातूंच

चपवनोराहुमंदजो कुजार्कोकुदृकोजीवोमधुरस्तुवरोबुधः क्षाराम्लोचंद्रभृगुजौतीक्ष्णोसर्पार्कनंदनो तुंबरःकषायः
स्थूलइंदुः सितः खंडः चतुरस्रोकुजोष्णगू वर्तुलोसोम्यधिषणो दीर्घोशनिभुजगमो खंडोदुश्चंद्रकारः विभासवयु
रूक्षवं कुजार्कोभूदइंदुजः इंदुर्वश्यः स्मृतो म्लेछौ सैंहिकेयशनैश्चरौ रक्तवर्णः कुजशोकोधिषणः कनकद्युतिः
शुक्रःपिंडसमः सोम्योगोरकांतिरनुष्णगुः मंदाराक्तस्य पुष्पेणसमद्युतिरथोष्णगुः रुधिरसंनिभवपुलः फणीकृष्णः
क्षानिरूपथा अवनीशोदिनमणिः तपस्वीराहुरीशिवः स्वर्णकारःक्षितिःपुत्रोब्राह्मणाराहुणीभवः वणिग्गुरुःकवि
र्वैश्योरुणलः सूर्यनंदनः सैंहिकेयोनिषादश्चसर्वकार्येषु संमतः युवाकुजः शिशुःसोम्यः राशिशकोचमध्यमो
मार्तंडमंथीददेवेज्यफणिनस्थविरायहाः जीवमंगलमार्तंडानुशंतिपुरुषान्बुधीः सोमसोमजमंदाहिभृगुपुत्रा
श्चयोपितः शुक्रेचंद्रेभवेद्दोष्यंबुधेस्वर्णसुदाहृतं गुरारत्नयुतंहोमसूर्यमोक्तिकमुच्यते भौमपुत्रःज्ञानोत्तहंरा
हावस्थीकीर्तयेन्नयहाणांक्रूरसोम्यत्वमुक्तवामनभवच जीवेंदुसोम्यशुक्रास्युःसोम्याः क्रूरग्रहाःपरे क्षीणे
दुक्रूरयुक्तोज्ञोराहुःशेक्रूराः प्रकीर्तिताः (वडुमांसरोम्णांमंदोथमज्जास्थांभास्करोग्रभुः कुजोरक्तस्यशुक्रस्य;
भार्गवोमंदसः शीशेरविशुक्रोधरासुतः स्वर्णनुःसूर्यनंदनः चंद्रोबुधःसुरगुरुः प्राणादिगधीश्वराः सूर्येदुजीवाः
सत्वस्थाःशशुक्रोचरजोगुणाः रभौमरविजारतमोगुणमयाःस्मृताः पिनष्टादियहलक्षणमाहचंद्रेश्वरः कू
रदृष्टोयुतोवापिक्रूरांकांतविरश्मिकः स्वविनष्टग्रहस्वरेवाविसारोवनिरूप्यते राहुणाकांतदृष्टोदिवाकरनिशा
करो हितोक्रूरणयः स्वेटः समराशिस्थितोपिवा पापाकांतसनिर्दृष्टः समांशेक्रूरसंयुतः अंतरालविहीनोयोद
क्ष्यापश्यतिपूर्णया सशेषःपापसंदृष्टोराशिहीनार्कमध्यगः अथग्रहस्वरूपप्रयोजनं तत्रब्राह्मणादिजाति
ज्ञानं ग्रहत्वादिवयोज्ञानं धातादिग्रहतिज्ञानं चतुरस्राद्याकृतिज्ञानं पुंस्त्रीवनिप्रयोजनं ममकार्यमस्मि
न्वर्षेकेनभविष्यतीति प्रश्नेवर्षेशसमजात्यादिकेनवर्षलग्नेशसमजात्यादिकेनचमनुष्येणचाकार्यसिद्धिर्यंक
टुकादिरसज्ञानं तुर्यस्थस्वटवशतोभोज्यान्नेरसमारिशादित्यादर्थे स्वर्णादिद्रव्योक्तिः वर्षेसबलग्रहस्य

द्यथलाभः निर्बलग्रहस्यद्यव्यहानिरित्यर्थः प्रभादादिकालाक्षि : भोजनविचारेकालज्ञानार्थं ग्रहवर्णप्रयोजनं वर्षेस
बलग्रहवर्णबस्तुलाभोनिर्बलग्रहवर्णवस्तुहानिरित्यर्थः एवमन्यदपिज्ञेयं इतिग्रहस्वरूपं अथवर्षप्रवेशावेला
नयनं तत्साधनमुक्तयादवनृशाकवर्जमानोनयुः शाकहीनागनाब्धयश्चनृधृतिर्धेयः भुवा १ बाणचंद्रे १५
रिलाशमृतुस्थे ३१ रिलापावके ३१ स्मादितास्तविधेयाः जन्मचारघटिकाः पलयुक्ताः पक्ष्युपर्युपरिगोदिवसाद्यं
सप्तशरकर्मिदिनपूर्वं स्वागताभवतिहायनवला अवेवसुगमोपाय उक्तादेवसचक्रवृद्धामणिशिरस्मद्गुरोस्ते
ष्टभ्रातृभिः श्रीमन्नीलकंठदैवज्ञैः गताः समाः पादयुताः प्रकल्पिताः २१ घ्नसप्तभागोनयुवेदा ४० नघटीयुक्तोजन्म
वारादिसंयुताः अब्दप्रवेशवारादिसंज्ञः ७ नष्टेवर्षनिर्देशेतु प्रकारांतरमुक्तं ग्रहज्ञानभरणे इष्टः शाकोजन्मशकेन
हीनस्त्रिघ्नोसपादोदलितश्चवसार्कः युक्तस्वजन्मगधरपूर्वैः स्फुटाभवदिष्टवर्षप्रवेशवेलेति एवंवर्षप्रवेशज्ञा
नानिकर्तृभिरनेकैः प्रकाराभिहितास्तत्प्रयोजनाभावाद्ग्रंथबाहुल्यभवाच्चनलिख्यंते अथराविजन्मः नीष्टकाल
वियोगविशेषोक्तोनाजिकालसंस्कारे निशिजन्मभवेद्यदातदागतवारादिकमवर्षसंयुतं दिनभानघटीयुतस्तयापल
र्णवैरिहतास्तरागनृइति यद्यराविजन्मनिवर्षसंपोथ्यघटीयुताविगतघटीकायोज्याः नवर्षलग्नस्पष्टघटीकरणं
सषड्भभूर्यात्कर्तव्यं यतोगतघटिकासूर्यास्तात्यातीइति अथवावर्षसंपोथ्यघट्यायस्मिष्टकालेप्रकल्प्यस्वजन्मल
ग्नंचरविप्रकल्प्यायस्फुटंग्रहर्क्षप्रवेशलग्नंभवति एवंसकलगणकसार्वभौमश्रीमद्रामदैवज्ञसूरिवरोः मादशेर्नृ
कैः विशेषाः कर्तुशक्यंनेपरंतुविस्तरभयादुपेक्षितः अत्रेदंध्येयं यदिचेत्रादिरंतरमपिभीनार्कजन्मतदापूर्ववर्ष
वर्षशाकएकजन्मशकः प्रकल्प्यः एवंजन्मार्कसमभानौजाते सत्येकवर्षवारादिसमवारादेरंतरंचस्यात् तस्मात्सोरवर्षादेश
ष्टशाकःकल्प्यः मेषादेरूर्ध्वखंडमशकएवज्ञेयः अन्यथाधिमासंभवेकदाचिदेकोद्वादशवर्षमध्येद्विवारंजन्मार्क
संभवेनवर्षद्वयोत्थवारादिवैलक्षण्यमपेक्षितमधिगतसमासाभावेनस्यात् एवमधिमाससहितवर्षादिप्र
मवर्षकदाचिद्द्वादशवर्षमुच्छ्यापिजन्मार्कसमभानौजाते सत्येकवर्षवारादिसमवारादेरंतरंचस्यात् तस्मात्सोरवर्षादेश

कप्रवृत्तिसेयेति अत्रजन्मार्कतुल्योरवर्षस्मिन्मासेभवतितस्मिन्नेवमासेवर्षप्रवेशज्ञेयः उक्तंच तिथ्यादिपंचेजननार्क
तुल्योरविर्वर्षेवत्समएवमासइति नत्रजन्मार्कसमारविर्यदिजन्ममासेनायातिपरेपूर्वेमासि आयातिदशजन्ममासएकर
हितएकयुक्तोवाकर्तव्यइति अथवर्षध्रुवकोपपत्तिः अथवर्षादिसाध्यसाव्यसोरमेव उक्तंचसिद्धांतशिरोमणौ वर्षायनर्तुयु
गपूर्वकमत्रसोरादिति अथरवेश्चक्रभोगेकवर्षप्रदिष्टमिति नवेदोक्तद्वादिभगणभोगेनसोरवर्षंभवति तत्रस्यष्ट
गतेश्चबलवत्त्वात्सोरवर्षादिः कदाभविष्यतीतिनिर्णितासायांप्रत्यक्षफलश्चाजन्मकालीनसूर्यतुल्यः सूर्योयस्मिन्दिनेनव
भगणभोगस्यातत्वाद्वर्षादिर्नातः नस्यात्तनेउपायः यदिकल्पसोरवर्षेः कल्पसावनदिभानिनदेकेनकिमितिलब्धा
कस्मिन्वर्षेसावनाहाः ३६०।५।२५।३१।३१। वारस्येवापक्षितत्वाउपरिसप्त ७ नष्टशनाताः ।१।१५।३१।३१ चतुर्युस्थानेपुयुगणभा
तः यद्येकस्मिन्वर्षेएतत्सावनाहास्तदाभुक्तवर्षैः किमिति तत्रगतवर्षाणिअनेन १।१५।३१।३१ चतुर्युस्थानेपुयुगणभा
रूपेणभान्यादिफलंजन्ममभयावारभ्यसावनदिनानि अस्मिन्नेजन्मवारादियोगरूवर्षप्रवेशीयादिवसघटीफलसा
नार्थरूनः अर्कफलघटीभ्यः षष्ट्याऽर्धोर्धंयोजनंपलघटीनांषष्ट्यधिकरवाभाधानूरूनं धाराः सप्तधातः सप्तनष्ट
मित्युक्तंएवंरूनेनस्मिन्सावनवेदिनेवर्षादेः स्पष्टोभवतीत्युपपन्नं अथेकवर्षमेवज्ञादग्रिमाब्दादिप्रवेशज्ञानंभृ
बाणविधु १५ भूराम ३१ रवाग्नि ३१ धारादिकंयुक्तं वर्षमासादिनावेशाग्निमस्यातिथिरीश ११ युक्तइति नवसोर
वत्सावनचांद्रनाक्षत्रचार्हस्यत्यवर्षाणांसंभवात् कथंसोरमानेनैववर्षप्रवेशोभिहितः अत्रोच्यते चांद्रसावनव
र्षयोस्तुसूर्यस्यचंद्रस्यवासाम्याभावात्त्याग; चार्हस्यत्यमानेनुजन्मकालिकराश्यादिमध्यगुरुणाजातीष्टचार्ह
स्यत्यवर्षेयद्यपियुगेरविसाम्यंभवति तथापिराशिसाम्याभावात्त्याग; नाक्षत्रवर्षेनियतोचंद्रसाम्यंभवति
तथापियक्षाग्रेसरस्यग्रहणांतेनोदाहृत्वरवेः सोरवर्षंराश्यंशकलाविकलासाम्यादत्रचवर्षायनर्तुयुगपूर्वक
मत्रसोरादु इतिसिद्धांतोक्तेः यावानूजन्मनिभानुरित्यादिर्नीर्णतांतेकोक्तेश्चसोरमानेनेवाब्दप्रवेशकरणमुक्तं
अथमासेर्हदंशभिर्वर्षमिति सूर्यसिद्धांतोक्तेश्चवर्षमासकरलवेनसभावेनूस्यष्टमासफलसादिशेत्सुधीरिति

जीर्णनाक्षिकोक्तेश्वसौरमानेनैवमासप्रवेशोविधेयः ननुमासासाधनचिन्तयासुद्दिनांशकमानादिसिद्धांतोक्तेर्मासप्रवेशोचांद्रमासस्यैवमुख्यत्वमितिचेन्नयथासौरमासप्रवेशेसूर्यासन्नमंशतापकंननथाचांद्रमासप्रवेशेकिंचिदस्ति अथवा अधिमाससंभवेत्रयोदशमासानांतत्वात्पूर्वकसूर्यसिद्धांतवचोलोकप्रसिद्ध्यर्थमाहत्येतन्नस्मात्सौरमानेनैवमासादिनप्रवेशादिकंविधेयमितिसिद्धांतः अथवर्षप्रवेशसमयेस्वस्वार्कीतसिद्धांतकरणादिरीत्यासाधितोर्कोनन्मध्यार्कीर्कनावश्यंसमोभवति इदमेववर्षप्रवेशसमयेप्रमाणं॥ उक्तंचसमरसिंहेन॥ यावान्जन्मनिभानुस्तावान्वर्षेस्फुटस्तथैवमपि॥ श्रीमन्नीलकंठज्योतिर्विद्भिरप्युक्तं तत्कालेकोजन्मकालरविणास्यादृतः समइति एवंनिष्पन्नस्याब्दप्रवेशकालस्यस्पष्टीकरणमुक्तंहरिभट्टेनाब्दिकसारे॥ सूर्यैर्वर्षसमुद्भवानाहृत्यैवंजार्कनुत्योयदातद्वर्षावधिहृतंतत्रयोसुविवरलब्धंचहीनान्वितं वर्षावेशघटीपलेषुसततंवर्षाकृतानाधिकेजन्मोत्थेयुगणेहिवर्षसमयस्तेवंभवेत्स्फुटइतिपार्थपुरनिवासिगणेशदैवज्ञेनाप्युक्तंनाब्दिकभूषणे॥ जन्मकालनलिनीविलासिना॥ नेययानिनुलनाकलासचन्द्रवर्षकालनलिनीपतिस्तयोरंनरंगतिहृनंयुतोनिते॥ कार्यवर्षेध्रुवेनस्मादसोस्पष्टःप्रजायतइति अथवर्षार्कजन्मार्कसाम्याभावात्कालस्यस्पष्टीकरणमुक्तं तत्रस्वार्धीनकरणात्स्वदेशेपूर्वापरयोर्यानरदेशांतरादिकर्मसंस्कृतोजन्मकालीनस्पष्टार्कस्तत्करणयातदेशांतरादिसंस्कृतोवार्षिकस्पष्टार्कोजन्मार्कसमोयत्रभवति॥ तदासाम्यंनुस्फुप्यायमानं अत्रधूलीकर्मणाप्यज्ञानमात्मनोदृग्विकारोवायुर्भान्॥ एतद्गणितपूर्वकंसकलभूपालमौलिमणिनीराजितचरणकमलानांभूमंडलखंडलानांश्रीसाहिसूनामहाप्रभूणांमासप्रवेशानयनलिख्यते अतःकालस्पष्टीकरणमयुक्तं अथयच्चैवमुच्यतेपूर्वोक्तानुपातसाधितत्वात्कल्पमध्यगणोत्थः सावनध्रुवोपियहवन्मध्यमस्तत्साधितवर्षकालस्यापिमध्यमत्वं मध्यमस्पष्टीकरणंयुक्तमेवेति तदपिन्यूनः सौरवर्षानेसमुपचयापचयसाम्येनमध्यमस्पष्टसावनोस्युस्त्यत्वासौरवर्षानः पातिसप्त ७ नष्टसावनोध्रुवस्पष्टएवतत्साधितोनः स्यादिः सुतरांस्पष्टस्यपुनःस्पष्टकरणंनिर्युक्तिकं अतएवयावान्जन्मनिभानुरितिपद्येनार्किकंनृपुकृपिस्थानाभिषिक्तेनसमरसिंहेनवर्ष ॥ ५ ॥

कालस्पष्टीकृतिर्विनेस्पष्टार्कसाम्यमुक्तं॥ ननुमध्यार्कसाम्यम्॥ अतोहरिहरभट्टगणेशदैवज्ञनंकालस्पष्टीकरणमयुक्तं॥ इदंपुनरिहावधेयं भ्रतिवर्षकल्पयनांशगतिविशिनन्यनोभूयसिकालेगते ः यनांशवशेमोदयांतरयोर्वैलक्षण्यान्तःसंस्कृतस्तत्करणंजातदेशांतरादिसंस्कृतेपिवर्षार्कोजन्मार्कसमानभवतिनदर्थमनुपातेनानरंसाध्यं॥ तद्यथा॥ यदिसूर्यस्पष्टगतिकलाभिः षष्टि ६० घटिकास्तदार्कीनरकलाभिः किमिति॥ लब्धेनाः यातेन वर्षावेशकालः॥ स्कंस्कार्यइति॥ तस्मान्तत्करणीयस्वदेशांतरभुजांतरसंस्कृतो ः भीष्टायनांशवशाद्दृक्प्रबोदयांतरेणतद्देशजपलभोत्थतात्कालिकचरणंचसंस्कृतोवर्षार्कोजन्मार्कसमोयदिनस्यात्तदेवकालस्पष्टीखमन्यथानेतिसिद्धांतः॥ श्रीमन्नीलकंठदैवज्ञेसुस्वर्त्यांतरत्वान्नलमनेनकोपिदोषः॥ अथवर्षप्रवेशेनिर्ध्यायेनेनमुक्तंपट्टनिनृपणे॥ समासमाजः शितिकंठ ११ निघ्नः समार्द्धिभागेनसमन्वितोः सोस्वजन्मनिध्याचखरामः ३० तष्टस्तिथिर्भवेद्वेदयुताकदाविदिति नक्षत्रयोगानयनमुक्तंनार्किकसारेऽयंमेदुभिः संगुणितागतास्ताः स्वभून्यवेदाब्धि २४० लवैर्विहीनाः जन्मर्क्षयोगैः सहिताः पृथक्स्थाः नक्षत्रयोगेभवतोभ २७ तष्टलग्नानयनमुक्तंपट्टनोसमासमानस्त्रिगुणाः समानांशगशुक्लोननिलघ्नयुक्तः सूर्येंदुनः शेषसमंलग्नं सामान्यतोमान्यनमेवगाहीनि अभ्रतिथिनक्षत्रयोगावर्षप्रवेशादिवस्यप्रायोनेकद्व्योर्यांति॥ उक्तंचसुधानिधौ॥ निश्चयोवक्षदाक्षेयोवारात्सर्वत्रायने तिथिभंयोगतोज्ञेयमनुमानंभयोगयोरिति लग्नमपिकालनेकद्व्योसमायातीतिसेयं अथसंक्रांतिज्ञानार्थंदैवज्ञमुकुलंकारगणासकलगणकसार्वभौमानामस्मद्गुरुचरणानांश्रीरामत्यात्मजविर्विरोपंथानि शार्केकरस्वेषु १५२९ महीविहीने विस्थेसपादेदतिनेचसार्द्धे स्वनाष्टवेदैः ४८ रतिभिः २० क्रमेणयुक्तोद्दि ७ नष्टक्रियसंक्रमस्यात् अथेकस्यासंक्रांतिज्ञानायांनदग्रिमसंक्रांतिज्ञानार्थमूर्वं दस्रो २ दोलशरा ५७ रसा ६ सुणयमा २२ स्त्रीणिहयं २ षडु ६ यद्रामा ३० होसगुणा २३० ऋतारसशराः ४। ५६ पंणागवेदाः कमात् ६। ४८।
भूमिः १ सप्तदश १७ हयंरसगुणा ३६ वेदास्त्वयंमार्गणा ५ रुद्रयक्षा ५३ धासरनाडिका रुद्रदिनायेयंतिनाः सु

र्षात् १ अथ संक्रांतेर्निधिज्ञानोपायः शक्रोनवाब्धिनिघ्नो १०३९ रुद्रैः शरैर्गुणैर्युभिः ११३।५३ निष्प्रोरुद्वान्विनः ९१ खाग्निनंदेर्मधादयस्तिथिः द्विदोगाष्टदिग्द्वाः २।४।६।८।१०। ११ ॥ युनास्यादन्यसंक्रमे द्विहिद्विहिद्विहिभूमिर्वा २।२।२।२।२।१ युक्ताधोधाकियासरदूनि ॥ अथ वर्षप्रवेशसंक्षिप्तपंचांगफलमुक्तेचलोक्यप्रकाशे ॥ नंदाभद्राजयापूर्णाः शुभदास्तिथयोमताः हादस्याद्याश्चरिक्ताश्चनशुभभावर्षवर्द्धने सोमोबुधोगुरुः शुक्रोचाराश्चत्वारउ-

नमा ॥	मे	वृ	मि	क	सिं	क	तू	वृ	ध	म	कुं	मी	वारादीक्षेपदमे
मृगशी	०	३०	६	३	६	३	६	६	१	३	४	५	॥
वेशेशु			३३	३	३०	५६	५८	१०	३६	३	५३		
श्रवणं	०	२	८	६	८	१०	११	११	११	११	११	११	तिथिक्षेपाः ॥

भौमार्कशनिवाराश्चवर्षेहानिभयप्रदाः॥ अश्विनीवर्षचंद्रस्तः पुष्यः पुनर्वसुः स्वातिश्चरेवतीचेवर्षाभावहाः ऋक्षिकाराद्रिणीचाद्रार्द्रोत्तरामूलस्यानारक्षानुराधाचमध्यपूर्वोनत्रयं॥ भरणीचमघाचित्राविशाखास्वातनतारकाः धनिष्ठाःश्लेषिकाश्लेक्षावर्षवेशेनिनिंदिताः विरुद्धयोगविस्थाचवर्षवेशेनशुभेदाति अवधेशेषऊक्तोदीपिकायां जन्मर्क्षयुक्तायदिजन्ममासे यस्यध्रुवंजन्मनिधिर्भवेच्च॥ भवंतिनद्दुःसरणवनित्यंनरूस्यसौभाग्यसुखान्वितस्य॥ ऋतांतकुजयोर्वरियस्यजन्मदिनंभवेत् अरक्षवागसंप्राप्तोमंगलस्यपदेपदे नक्षत्रः अदृश्यः ऋतांतग्रहाः लग्नेशऋक्षभाशऋक्षफलमुक्तंहायनसंदरे॥ऋक्षभयहयुतेसौम्यवर्षस्वामिदृशायुते॥ रोगोद्वेगापदाशाः सुतदारादिसंपदा॥ देशभृत्यर्थलाभः स्याद्वातापोक्तानृपःप्रियः॥ सोत्यंचविपुलावुद्विर्वर्षलग्नेशऋक्षगे॥ क्रूरवर्षेक्रूरयुक्तेक्रूरस्वामिदृशायुते॥ रोगोद्वेगभयंदुःखंज्वरोहानिरदिद्रता॥ राज्यभंगंतथाशस्त्रंस्वबंधुकलहंकुले॥ स्थानभंगंधनाप्तिंचवर्षलग्नेशभऋक्षभमिति॥ अथ वर्षप्रवेशेशुभाशऋक्षफलज्ञानार्थं समुद्रचक्रमुक्तं विष्णुयामले॥ निर्यग्ऊर्ध्वगतारेखाश्चत्वारस्त्रीन त्रीन संलिखेत् ऋक्षिकादीनिऋक्षाणिपूर्वादिक्षुक्रमात् मध्याश्चत्वारःसागराःस्थाताः तीरसागरपार्श्वयोः चत्वारः सर्वकोणेषुपूर्वादिदिक्षुक्रमात् त्रिभिर्भसागरेदेयं एकैकंतीरकोष्ठकं कोणद्वयंद्विभंमध्यास्थाविंशतिसंख्यया यत्रयात्यन्नक्षत्रं तत्कोष्ठंवर्षफलंवदेत् ऋक्षिकाश्चउपलक्षणंवर्षप्रवेशमासप्रवेशनक्षत्राच्चक्रमात् पर्यायक्रमन्नक्षत्रंवर्षेमासदि-

पर्वत पू॰	तीर आ	सागर स॰ गं॰ क॰	तीर भ॰	पर्वत अ॰	पर्वत रे॰
तीर भे॰	॥	॥	॥	तीर उ॰	
सागर प॰ फ॰ ब॰	॥	समुद्रचक्रं	॥	सागर ध॰ शा॰ पू॰	
तीर हृ॰	॥	॥	॥	तीरश्च	
पर्वत चि॰ स्वा॰	तीर वि॰	सागर ज्ये॰ मू॰	तीर ए॰	पर्वत उ॰	भ॰

नफलंक्षेयं मासाब्दवर्षान्मासायदिनान्हृहभवंतिवेदुः खंसमुद्रंरवमेषतीरेशैलश्रियंमंडलनेमनुष्यः जन्मर्क्षगेचंद्रवतीहवर्षेनाधिदुः खंविलविष्णुनंदनेति ॥ अथ वर्षप्रवेशेशऋक्षभाशऋक्षफलज्ञानार्थंविपनाकिचक्रमुक्तंकाश्यपः॥ रेखात्रयंतिर्यगधोर्ध्वसंस्थमन्योन्यविद्धाग्रमुभेशकोणात् स्मृतंबुधैरत्रविपनाकचक्रं प्राड्मध्यरेखाग्रगवर्षलग्नात्

न्यसेद्विचक्रंक्रियतत्रसेकं पातादसंख्याविभजेन्नभागं; ९ शेषोन्मितेजन्मगचंद्रराशेःसुःयेचराशीविलिखेद्धशोकः परेचतुर्भानिशशेषतुल्ये स्थानेस्वराशेः स्वचराःस्फुटंस्युःरेखा॥ स्वर्भानुविद्धेहिमगोतुकर्तेताधार्किविद्धेकुजिनेनविद्धे महीजविद्धेतुशशीरपीडाशऋभेश्वविद्धेनयसोखलाभः॥ ऋभाशऋभंयामगवीर्यलोभंफलंवर्षस्यवदंत्यमात्यं मैत्रो रोगाहृचंद्रोचरधरेखागतोमृतिः॥ एवंमासेदिनेहिद्वान् स्वस्यभुक्तिंभमाणतः इतिमेषादिरूपलक्षणार्थंलिखितंमेषस्थानेवर्षलग्नंज्ञेयं ॥ अथविनयचक्रंरत्नायस्याम् ॥ अथातः संप्रवक्ष्यामि पनाकीचक्रनिर्णयं जन्मलग्नाद्दर्पकलं स्फुटज्ञानंभजायते तिर्यगूर्ध्वगतारेखास्तिस्रःसमालिखेत्तु॥ कर्णविधःप्रकर्णाख्योरुद्वाद्वाविभिश्चशेयेत्तु॥ प्रत्यक्चलनचंद्रोराहुर्भोमोरविः समो॥ शेषाश्चत्वारिवर्षाणि सव्यमार्गेभ्रमंतिच॥ ३॥ अपसव्येराहुकेतुवर्षेसंख्यऋभाशऋभं मासेमासफलंचंद्रराशिभोगादिहिर्दिशेत्तु चंद्रभावोयापविद्धोभावनष्टस्तदाशुभंवेत्तु वर्षेमासदिनेनाड्यामूह्यात्वायुक्तमूह्यात्फलं॥ दृष्टिप्रत्यक्चुभयेधनभावेज्ञात्वनधाफलं॥ मिश्रेमिश्रंफलंवाच्यं युगपद्दृष्टनोभयेतू॥ ६॥ सदलंदिहिवाभ्यंचमासस्थानादिलोकयेत्तु॥ सदलार्कघटीभिश्चदिनस्थानादिलोकयेत्तु॥ ७ तस्मिन्कालेफलंवाच्यं निश्चिनंतच्चभावजं॥ तस्मात्सूक्ष्मफलंवाच्यं घटिकेकाप्रमाणतः॥ ८॥ इतिविपनाकीचक्रं अन्यच्च ॥ रेखात्रयं रेखात्रयंअन्यसंतिर्यगधर्ध्वकोणतः षेषचयंस्मृतंचक्रंविपनाख्यामनीषिभिः १ जन्म

Dr. BHAU DAJI MEMORIAL

लग्नजनानांयन्मध्यरेखास्थितंलिखेत् स्वराशितोगताधांक १ भक्षैक्यं शेषामितैर्विभुः २ वर्षैश्चक्रमतोमासं मासैः संक्रमनैर्दिनं॥दिनैश्चसंक्रमनैघशुद्धं कृत्वाशेषंचलग्नेः॥३॥एवमन्येनयेनाग्रे गतायुर्यत्रनिश्चितियत्रयत्र यहाः सर्वेस्थाप्यंतनत्रत्र॥४॥चक्रंचविपताकाख्यं योजानातिनरोभुविकरादिचित्तस्यवचनैर्निः फलंनेजायते ॥५॥गतवर्षाश्चतुर्भक्ताः शेषंचान्यग्रहाः स्मृताः॥शषविलामतोशद्रः कृतुश्चापिनथेवच॥६॥येधयदकरस्था यांराहुश्चंद्रनरस्यच॥ तदाकर्षंविजानीयान्नवर्षंस्फुटनिश्चितं॥ ७॥राहोर्जीवस्यवेधेतु मृत्युःकरवनसंशयः शु क्रवधभवेत्सौख्यंलाभोभवतिनिश्चितं॥८॥राहुश्चंद्रस्यवेधेतु तथेवज्ञनिभोमयोः॥तत्रवर्षेभवेन्मृत्युः रोगानांगमनं रणं॥९॥बुधभौमगजीवानांचंद्रवेधोयदाभवेत् तदर्षेतद्दिनेराज्यं अर्थलाभंसुखंसदा॥१०॥क्रूरस्फुटगतिर्मर्मकंटकंसंस्थिकोणगे॥शत्रुक्षयंचनृपतेर्भीतिः क्रूरःक्रूरेणरुद्धगश्चले॥११॥मर्मवेधभवेन्मृत्युः कंटकेकुलक्षयः॥शत्रुक्षयंचनृपतेर्भीतिः क्रूरेणक्रूरसंस्थिते॥१२॥रविवेधभवेन्नाशोद्रव्यहानिर्धनासने॥रोगपीडाकरो मंदोराहुकेतूचमृत्युदौ॥१३॥गुरुवेधेभवेल्लाभोरतिलाभश्चभार्गवे॥स्त्रीलाभश्चंद्रवेधेचसुखंचबुधवेधगतः॥ ॥१४॥जन्मेराशेर्नवयेचफलमेतत्प्रकीर्तितं॥ इतिविपताकीचक्रं॥ अथाग्रसंगा दर्षफलमाह भक्षैक्यमित्यादि॥ जन्मलग्नाभिषंक्रमलग्नफलंप्रश्नवेष्याबोक्तं तिस्थनेजन्मादयाद्यास्पदजन्मवेशेस्पष्टियद्वायगतंशभाभि तं नद्वावर्हिभक्तरोनितस्मिन्वर्षेनृणांपापयुतेनदन्यधाजन्मोदयेदेहसुखंधनेर्थलाभःस्त्रीसौख्यंचकुटुंबवृ द्धिः तुत्थेसहजेसौख्यमथास्मज्ञातिपुत्रेऽथपष्ठेरिपराजयः स्यात् स्त्रीसौख्यमिश्रंभवतिमदनेमृत्युरुग्शीश्वरं धैः धर्मार्थिगिरुपसि ९ दशमे १० वित्तसौख्यान्मस्यरासिः लाभेलाभः सुखधनक्षयादुःखरासिद्यूनेतु १२ पुंसा मेषेप्रविशतिरवौजन्मलग्नाद्विलग्नइति एतत्फलंसोम्ययुतेक्षेयं पापयुतेमर्वविपरीतमिश्रंतुमिश्रयुतेक्षेयमि तिमयप्रवेशलग्नस्यजगद्गुरोर्तिलाभयवनाचार्यादि स्वर्षलग्नादपिजगद्गुरुविचारउक्तोयंचाकरेजन्मलग्नाद्यं स्वाज्जगद्गुरुर्यंयदाभवेत् अष्टमेद्वादशेवापिसवर्षेनशुभावहः जन्यापिविशेषमत्रैव अष्टमेद्वादशेवापि॥



वेधःपुरराशितः॥जगद्गुरुर्यंनथाहानिस्तपुरस्थनसंशयइति॥साधजन्म कालेर्थनसिद्धेनेनकरणेनवामकरंदरामविनोदादि सारिणीग्रंथेनचायहाः षट्कर्मसंस्कृताः॥ स्पष्टयहाः सगतिकाः साधनीयाः॥ उक्तंचपद्धतौ॥ शद्भवर्जेस्वचराः सचाराः करणान्निजान्॥ साधनीयंविलग्नंचस्पष्टंकार्यं निजादयैः तेग्रहाः स्पष्टाएव॥ उक्तंभास्कराचार्यैः॥ याताधिकाहास्त यजातकादौ॥खेटैः स्फुटैरेवफलंस्फुटंस्यमिति॥अब्दादिशब्देनवर्षमेव शादोक्तेयंम्॥ तात्रिकैसारेपि॥ विनाग्रहैः स्पष्टतरैर्न किंचित्फलं प्रवक्तुंभिनरांक्षमः स्यादिति॥अथब्रह्मसोदार्यादिपक्षाणांमत्यात्क स्मिन्पक्षेयंग्रहाः साध्याइत्युक्तं॥ दामोदरपद्धतौ॥ यांतिसंसाधिताः खेटाः यनदृग्गणितेक्ष्यतां॥तेनपक्षेणतेकार्याः स्फुटाःसत्तमयोदयइति॥ननुग्रहाणामार्षज्ञात्वादेवस्फुटीकर्तुंयुज्यते॥ननुमानुपानस्याः यथार्थत्वादितिचेत्सत्यं ग्रहानयनंमुनिकृत ज्ञात्वादेवकर्तुमुचितं परंतत्रापिकालवशेनांतरंपततिं॥ उक्तंचसूर्यसिद्धांते॥ शारदमार्षंनदेवेदंयस्मूर्यं वाहभास्कराः॥युगानांपरिवर्तेनकालभेदोवकेवलमिति॥ यासिष्ठसिद्धांतेपि॥ इत्थमांद्यसंस्कृतादृक्तुल्यंमयातत्स मं॥विस्वकीरविचंद्रोदेर्भविष्यतियुगेयुगे॥विस्मसनंविस्वकिः शाधिलत्वमितियावत्॥ सिद्धांतसुंदरेपि॥ मुनि प्रणीतंमर्नुजैः कचिच्चदृश्यतेनरैः तदातदेवसंसाध्यं नकार्यंसर्वमन्यथेतिनदेवरचीजनसंज्ञंब्रह्मयुगमकरंदमिश्रा दिभिः स्वसत्तादिकालंलक्षयित्वामुनिप्रणीतयुगेषुसंस्कृतंनतदुक्तमेव॥ तथाचब्रह्मसिद्धांते॥ मेसाध्यस्पष्टनरैर्बीजं॥नलिप्तादिर्यत्रेभ्यः॥तत्संस्कृतग्रहेभ्यः कर्तव्योनिर्णयादेशविरुद्धलम्॥ अथपंचांगपरिवर्तना त्यक्तिकीकरणेनस्पष्टग्रहानयनमुक्तं॥श्रीमन्नीलकंठदैवज्ञेः गतेथरिदसाद्येनगतिनिर्भीखषट्कृतेत्ता॥ल

श्वमंशादिकं यात्स्वांशेस्पष्टग्रहा भवंतीति ॥ अथपंचांगीयनक्षत्रादेवचंद्रस्पष्टीकरणमुक्तेनरवे ॥ स्वपट्टघं ६०
भयातभागा हृतनतखतर्क ६० घ्नधिष्ण्यघुयुक्तेहिनघ्नभशंशभागपूर्वमुक्तिः स्वस्वाभ्यश्चदा ४८०० भ
भागेनभक्ताइतिनक्षरंध्येयं पंचांगीयग्रहाः किंदृश्याः उत्पन्नश्चनतुल्याः किंदृश्याः नहिसर्वेदृश्यानतुल्याणामर्क
दृशानिष्यश्चपंचांगेनस्पष्टग्रहाः कर्तुंयुज्यंते दृशभहृतदृशांतरभुक्तिनरदर्शांतरचरपलादिसंस्कारसद्भावात्सूर्यादि
सर्वग्रहाणामन्यथादृशिनात् तस्मात्स्पष्टग्रह साहित्येनस्पष्टदृश्यापंचांगेऽन्यानदृश्यानतुल्याणांस्पष्टग्रहाः कर्तु
मिष्यंतेनत्वन्यथतिज्ञेयं ॥ अथलग्नादिहादेशभावसाधनमुक्तेचसूधानिधा ॥ ॥ जन्मवद्दृच्छादिशभाश्च
भेषु भावाधिपयाः सुधियायतोवं तत्तद्भावेवदिशंतिनिरंशकभाशभंभावकलनेनभागा इति ॥ नाडिकनिलक
पि ॥ भावसाधनमथाभिधीयतेहायनोत्थफलनिर्णयहेतोः जन्मयानरवतुवर्षयाते भावसाधनभवादिकारण
मिति भावानांनाम्न्युक्तानितानिकमुक्तावल्यां तनुधनभ्रातृसुहृत्सुतारिस्त्रीरंध्रधर्माः कर्मज्ञाविलाभान्
व्ययाः संज्ञकाश्चसंहारगत्यास्युरिमेक्रमेतुल्या इति अचलादिभावाज्ञानार्थमंशाद्यायथादहविचा
रलग्नान् द्रव्यविचारोद्वितीयान् एवंसर्वत्र एतत्सविशेषभावविचारेवक्ष्यामः ॥ अथननानयनमुक्तं ॥ सक
लत्रयीशेः श्रीमद्गुरुचरणेः पद्मनिचिंतामणेः नत्वादौनतोन्नतानयनं दिनार्धयुगुरादिगतावशेषनाड्यानंतप
श्चिमपूर्वकंस्यात् युथानहीनं शुदलननंशकूयुरवंडहीनंयुगनपरंतनू अथायनांशानयनं भूनंत्रवेदो ४२१
नशकोदेशांगहीनः स्वपट्टि ६० विहतोयनांशाः त्रिभार्कराशिः स्वलंबेनयुक्तरुताधन्मिमाधिकलाधिराप्यः
अथस्पष्टलग्नानयनं तत्कालार्कः सायनलस्वभाग्यभागैर्निघ्नः स्वादयः स्वाप्ति ३० भक्तः भाग्यंजन्मादिष्ट्वना
दीपलोद्धवंपादद्वयाः स्वादयश्चापशेषं त्रिंशद्निघ्नमशुद्धभागाद्यंमेषपूर्वकैः अशुद्धार्कग्रहयुक्तलग्नं
स्याद्ध्यनांशकं भोग्यात्यकालनूनंस्वविघ्नात्स्वादयान्तलग्नादियुक्तं रविरेवभवेद्दृग्मेषपट्टभार्कनिज्ञानतुः अत्र
जन्मदेशीयमेषादिलग्नमानेः लग्नस्पष्टीकरणं कर्तव्यंनत्वदेशोदयेरिति ॥ अथदृशमलग्नानयनं ॥ ॥

॥८॥

युक्तायनांशार्कगतेनघ्नभागालंकोदयघ्नाः स्वगुणा ३० हृतानतू स्याद्गुरुभोग्यंतपनत्यस्यजन्यात्सकीकृतात्प्राग्यपरान्वनाभ्रत
तू क्रमाद्गतेष्यानुदयाश्चस्वशोधेमसद्गहृहत्वा ३० गुणंलधाधम विशुद्धपूर्वापरभविहीनयुतेस्वभस्यादस्वभोगहीनं लग्न
मेषपट्टभदनाभिधानतुर्यभिधंस्याद्दृशमान्सपट्टभान् अथपूर्वनतोपेधनलग्नानयनार्थमहर्दीयदृग्ग्रहानयनेस्पष्ट
तंहत्वारविरूत्वासपट्टकं लंकोदयंदृग्विलयनकर्मणास्वाभंस्फुटं अथननंविनैवलग्नादेवदृशमलग्नसाधनमुक्तं
विधाहृदंदायने ऊर्वालग्नादर्कपद्माग्निखंडभूवाप्तेलग्नघटीभिर्विलग्नं चक्राधोनेलेचनकालमर्कलग्नेज्ञातमूलम
ध्यान्हलग्नेइतिअयमर्थः यथमंस्वामीष्टकालेस्वदेशीयादर्यलग्नंकार्यं तनलदेवलग्नंदृशमलग्नमर्थंसूर्यकाल
यित्वाअयनांशादयमानोक्तिवक्ष्यमाणविधिनाचरदयलग्नानेयं ततश्चरपलयुतहीनाद्यादिकाः पंचचंद्राः १५
शुदलमथनिशार्द्धाभ्यगोलेविलग्नमितिराविदलमानेयं ततोराविदलमेवेष्टकालंभकल्प्यप्राणादीनंलग्नमर्क
कल्पयित्वायस्तेलंकोदयरूपक्रमकारेणानींतलग्नंचतुर्लग्नंभवति अथतेष्यलग्नचतुर्थलग्नेषट्राश्यूनक्रमेण
समदृशमलग्नेभवंतीं अथलग्नचतुर्थयोः सिद्धोसंधिसर्वभावानयनेमत्कृतपद्यानि लग्नंचतुर्थात्संशोध्यो
धंषट्दुर्विभाजितं राश्यादियोजयेच्छुभसंधिः स्याल्लग्नविनयोः संधिः षड्दशःसंयुक्तोधनभावोभवत्स्फुटः धनभा
वः षड्दशादयः संधिर्धनतृतीययोः षड्दशः संयुतः संधिस्तृतीयभावदशने षड्दशाश्चतृतीयः स्यात्संधिर्भवेच्चतुर्थ
योः तीर्तृयसंधिरेकाद्यः संधिः पातालआत्मनोः द्व्यादयस्तृतीयभावापिपुत्रभावोपिभवत्स्फुटः आद्योद्वितीयसंधिः
स्यात्संधिः पंचमभावजः धनभावोवेदयुक्तोरिपुभावस्त्रयोदशे लग्नसंधिः पंचयुतोसंधिः स्याद्रिपुभावजः लग्नाद्याः
संधिसहिताः भावाः षड्राशिसंयुताः सप्तमाद्याभवंतीहभावाः सर्वेक्रमेणेति अथकेवललग्नज्ञानदेवसकल
भावसाधनार्थसुगमोपायोमत्प्रणीतः स्वेष्टलग्नाद्दृश्यमाणविधिनाचरमानयेत् लग्नमेषादिपट्टस्थेतेनोनाधिकेषु
१५ नाडिकाः तुलादिषट्सहिताः सकल्पाःसंशकाः पुनस्तैरंशैः सहितलग्नलग्नसंधिर्भवेत्स्फुटः तदंशैः सहितः
संधिर्धनभावः प्रजायते धनभावेस्फुटेयुक्तोधनसंधिः प्रजायते तेयुक्तोधनसंधिश्चयभानृभावोभवेत्स्फुटः तैः

॥ ९ ॥

संयुतो भावभावः संधिस्थानसहजाभिधः तृतीयसंधिसंयुक्तः तुर्यभावः प्रजायते पूर्वोक्तवत्संप्रसाध्याः शेषाभावाः समंधयइति भावफलविचारोक्तं श्रीनीलकंठदैवज्ञैः स्वदेसंधिद्वयांतस्थेफलंतद्भावनंभवेत् हीनधिकहिसंधिभ्यांभावपूर्वापरंफलं ॥ अन्यत्रापि ॥ आरंभसंधेः स्वचरोदयादेः फलंभवत्यादिमभावजातं विरामसंधेरधिकस्तत्तनीमागामिभावात्यफलंप्रदः स्यात् अथभावविशेषकानयनमुक्त्वाऽन्यं ग्रहसंधानरविशांशिनं लब्धाभीष्टफलंज्ञेयंतद्विभोगविशेषकाः अर्कांतरकरणेविशेष उक्तःपठितो॥ आयुर्मिथिद्वानभावाद्धाभावानकग्रहे भावस्थसंधिनः शेषोग्रहोभावस्तथाधिके भावनस्तुफलंसर्वजनमवर्षग्रनादिषु विशेषकानुमाननगमनप्रश्नयात्रासु अथकीरशोभावोग्रहसंयोगनशुभमशुभंवाफलंग्रयच्छतीत्युक्तंताजिकनिधकनिजपतियुक्तबालवारिपूज्यैर्दिसहितश्चविलोकितः सभावः अतिशयफलदोनशोषखेटैरथसहितस्त्ववलोकितावशेषः अवबद्धयमाणभावबलेसकलभावस्यफलदातृत्वेनिर्बलस्यनतित्रयं अथास्माद्ग्रहादयंग्रहः कस्मिंस्थानः स्थितिज्ञानार्थं यवनमतेनेतरेण संख्योक्तावितामणा अर्कादिभश्चंद्रपूर्वान्सलग्नात्यक्ताशाभालवाः पंचभूभ्यः ५५ चंद्रान्नाशोधिताश्चक्रभुमान्स्यात्तस्मिन्राशावन्यथाभरपरस्मिन्निति ॥ ॥ इतिश्रीमहेश्वरदैवज्ञवर्यपंडितरामादरात्समज्ञबलभट्टविरचितेहायनरत्नेराशिस्वरूपवर्षप्रवेशज्ञानप्रयत्नाधिकारः प्रथमः अथग्रहाणांदृगध्यायानिरूप्यते ॥ २ ॥ तत्रदृष्टिप्रयोजनमुक्तंताजिकालंकारे ॥ ॥ नभश्चरगणानांयोर्कायदीक्षणलक्षणं तावन्नशक्यतेवक्तुंफलंवर्षशुभाशुभमिति योगसुभानिभावपि प्रायेणकरणाप्यलिखेः अर्थातेपुरागतेभाग्यतिदृष्टिहीनः तथापिदृष्टफलेविनेक्षणंदर्शमिदंख्यानयनेतनोहमिति तत्रग्रहाणांचतुर्विधादृष्टिः एकांशयक्षस्त्रेहा समसप्तमकसमसंस्त्रेहा द्वितीयायुक्तस्त्रेहा अप्रत्यक्षस्त्रेहकारिका अकथितमवदृकार्यसंसिद्धिदा तृतीयायुक्तवेरा अप्रकाशितशत्रुभावकारिका चतुर्थाप्रत्यक्षवैरा आसोलक्षणं दृष्टिपरिमाणंचाहसमरसिंहः नवपंचमयादृष्टिः पादोना ४५ सर्वदृष्टिः सबलामलाषकदृष्टिरियंप्रत्यक्षस्त्रेहदृष्टिश्च तृतीयेकादशेदशा ३।११। दृष्टोयावीक्षतेतृतीयस्

Digitized by Arya Samaj Foundation Chennai and eGangotri

शांतदृष्टिश्चंशोना ४५ न्यस्यनुपद्भागे ९० दृष्टिश्च अनयोर्युक्तस्त्रेहादृष्टिः सर्वत्रकार्यसिद्धिकारीदशेचतुर्था १०।४ दृष्टिः पादहीनद्वयुक्तदुर्जनाख्यानु याचाभयमत्रकेसकलाप्रत्यक्षदुर्जनाख्यानु सायुद्वसगदकविवादहृष्टिःउक्तावुभौ दृष्टावेकर्क्षस्थितयोरप्युभयोर्दृष्टिर्मनासकला ६० दृष्टिः साप्युभयसप्तमनिभाःतिस्रोविरुद्धाः क्षुताख्याः स्युःविशेदहृष्टिफलमाहबामनः पंचमनवमेदृष्टिः सर्वसौख्यफलप्रदा प्रकाशकुरुतेत्र्यायाभिवाणिस्वजनात्तथा तृतीयेकादशेदृष्टिः सदास्नेहप्रयाहिनी सुखसंतोषदाभव्यायुर्दृष्टिधनप्रदा चतुर्थदशमेदृष्टिर्युद्धदुर्जनभीरुका मिश्रफानुदृष्टीदृष्टाशोकसंतापवहिनी उभयोःसप्तमेदृष्टिःप्रगटाग्निभवहिनी विवादंविग्रहंचैवत्यकटंचकरोतिहि एकस्त्रेवलिनीदृष्टिः धन्याकार्यस्यसाधिनी स्वस्थानफलदाज्ञायामिवपक्षातथैवच तृतीयेकादशेपादे १५ दल ३० थाम १० चतुर्थयोः त्रिकोणे ५।९। व्यंघ्रि ४५ मूर्त्यंशपूर्णपश्यनिस्वचरादृनि ॥ ताजिकसारेपादे १५ त्रिरुद्रे ३।११ सदलं ३० खं १० नूर्त्यं ४ पादत्रयं ४५ स्वानवं ९ पंचमपि ५ पश्यंतिपूर्णसमसप्तमकंचग्रहास्त्वन्यवलोकयंति अथकर्क समरसिंहशेषोभादृष्टिरुक्ता अन्ययोर्व्यवस्थायोर्व्यवस्थायोग्रहावेकस्थानगतौतावुच्चस्वग्रहगतो वक्ष्यमाणमंत्रीचक्रेणप्रकाशंतरेणबामिभवग्रहगोस्थानां तद्गानयोः दृष्टिःशुभफलदात्री यदानुसमशत्रुत्रीचगोस्थानां तद्गानयोर्दृष्टिरशुभेति अथयवननामांकितादृष्टिः मुक्तावलीस्थादर्कसप्तमस्थान्मुक्तावितातरवीयदृक्चतुर्थेतुनिस्वः प्रोक्ताःभयप्रदाः तृतीयेकादशेदृष्टिस्तदीप्रोक्तामहोत्तमा नवपंचमयादृष्टिस्तत्संज्ञासप्रोक्तामहाशुभेति अथद्वादशस्थयोःराशिभेदमत्यपिद्वादशांशमधेतयोरुच्चस्थानेदृष्टयायथोक्तफलदात्र्यः स्युः द्वादशांशांतिकमेनुसाधारणफलदात्र्यःस्युरित्युक्तं समरसिंहेन सर्वाश्चेतर्हिदृशोद्वादशभागांतरभुवेयुश्चेत् तत्सविशेषाःप्रोक्ता दृष्ट्यनुसारफलं सर्वमिति धामनाथपि दृष्टिस्थानेषु सर्वं पुरुषुद्वादशांशांतरस्थितिः शीघ्रग्रहाद्दृष्टिमंदः शुभस्तादृष्टिरुच्यतेइति अथग्रहणं दीप्तांशमध्येदृष्टिफलंपूर्णप्रोक्तंयच्छेनिस्वचरादृनि ॥ सशांतेवापि ॥ पुरः पृष्ठस्थदीप्तांशविशिष्टदृकफलंग्रहः दृष्टादृष्टिकमनर्षांमध्यमंदृकफलंविदुरिति विशेषान्मुक्तावल्यां शीघ्रस्वचरपुरः स्थिरभा

मीतस्वदृङ्गदितायफलासा अन्यथाभवतिभाविफलात्ता वर्तमानफलदासमगत्याइति अन्यापिविशेषदृक्कर्त्तात्रिकसारे॥ क्रूरग्रहाश्चेत्स्वदृष्टिसंस्थापापतराः सौम्यदृङ्निस्थिताश्च यर्ध्वंनेदृष्टिफलं यथार्कफलं नरदृङ्चविलोमसंस्थाइति यदानुक्रूराः सौम्यदृष्टिविषयगाभाः क्रूरदृष्टिविषयेनदार्दुफलदातारः स्युः क्रूरसाम्ययोर्योगचरणचयंफलंतत्र यंयंग्रहंवामनः दृष्टदृष्टिस्थिताः क्रूराः सौम्याः सौम्यदृगाश्रिताः दृश्यदृक्फलं पूर्णं नृणां यर्ध्वंतिरश्चराः व्यत्यस्थाः फलंस्याद्दुर्यर्ध्वंतिग्रहदृष्टिजं पादानसाम्यापेक्षेश्चफलंक्षयंविचक्षणेरिति॥ विशेषांतरमाह्रसमरसिंहः चक्रस्यवामदृष्टिर्दक्षिणदृष्टिर्बलीयसीज्ञेया॥ अथवामदक्षिणदृष्टेर्लक्षणमुक्तंहिल्लाजेन॥ यूनाद्यराशिषट्कंयात्प्राग्व्यंचनलग्नात् यात्याभ्यांतरयोपिसंज्ञकावामदक्षिणाख्यातुवामनापिचक्रार्धंतर्लेदृष्टिर्यहाणांवामदक्षिणा ज्ञेयानाभ्यांबलंशोढावामदृष्टेसुदक्षिणेति॥ अयमर्थः॥ लग्नस्थग्रहस्यलग्नस्थभुक्तभागाशरभ्यसप्तमभुक्तभागपर्यंतंयादृष्टिः सादक्षिणा एवंसप्तनवमांशयावदापिदृष्टिः सादक्षिणदृष्ट्येपक्षयानिर्बलज्ञेयेति॥ उदाहरणमाह्रसमरसिंहः॥ भुक्तंद्रेष्काणदृष्टिर्मध्यात्सबलेतिसर्वंतोव्यूह्यं॥ अस्यार्थः॥ दशमकर्क्षाद्यन्मकाशाद्भुक्तंद्रेष्काणपर्यादृष्टिः सासबला एवंसर्वत्रसंज्ञेयं॥ अयमर्थः॥ दशमस्थग्रहस्यचतुर्थपर्यंतंयादृष्टिः सादक्षिणदृष्टित्वात्सबला अतश्चतुर्थादशमंयावद्यत्सावामदृष्टित्वान्निर्बलाइत्यर्थः अथस्थानविशेषोक्तदृष्टिविशेषफलनिर्णयार्थंस्पष्टदृष्टिकलानयनमुक्तंसंज्ञातंत्रे अथास्यपश्चंनिजदृष्टिसंज्ञेदादेकादिशेषभुबलिप्तिकास्युः पूर्णं० खवेदा ४० खिथयो १५ खेवदा ४५ खंपदृष्टि ६० रभंशरवेद ४५ संख्यातिथ्यः १५ खवेंद्रा १० वियद० भ्यनर्काः ६० शेषांशायातेव्यतिशेषघातान्नवधंखरामै ३० रधिकोनकास्येः स्वर्णभुक्तेनाः स्फुटदृष्टिलिप्ताइति॥ अथवासुगमोपायोमत्कृतः॥ इष्टग्रहविहीनदृश्यशेषतोदृष्टिरुच्यते एकशेषेविनाराशिमशार्द्धंदृष्टिरुच्यते द्विशेषपंचभू १५पैतंभागार्द्धंचविंशेषकं भागार्धंविंशतिः ३० युक्तंचतुर्भेस्यार्द्धसंयुताः भाग्यांशाः ४ पंचमंहिघ्नभुक्तांशादृष्टिरुच्यते षट्कृ

द्विघ्नाः भोग्यभागाः ६ सप्तमेस्यार्धसंयुताः॥ भुक्तभागाभवेद्दृष्टिः कलाद्यास्तानिकोदिताः अष्टरामाद्रिकंशोत्थं भा

राशयः	०	१	२	३	४	५	६	७	८	९	१०	११	१ अं	२ अं	३ अं	४ भा	५ भु	६ भो	७ भु	८ रा	९ रा	१० ख	११ सु	१२ भो	शेषे
दृश्यः	६०	०	४०	१५	४५	०	६०	०	४०	१५	१०	०	शांशा	शांशा	शांशा	गांशा	क्तांशा	ग्यांशा	क्तांशा	शांशा	शांशा	रादि	यदि	क्तांशा	दृष्टि
उत्क्रं	६०	४०	२०	३०	४०	६०	४०	३०	४०	३०	११	११	पंम	युनं	दिय	नां	दृष्टं	युजी	दृष्टं	दृष्टं	दृष्टं	फलं	युनं	दिय	कला
	क्रम	ध	क्रम	ध	क्रम	ध	क्रम	ध	क्रम	ध			जी				जी		जी			दृः	दृः	जी	

गार्यांभव ११ राशितः शेषमंगीयंनं द्वाभ्यांहनंदृष्टिसुजायतेनवमे॰ दशमप्येवंज्ञेय ११ मेभुक्तभागका॥ दृष्टिघ्नाः ११ शून्यभेद्विघ्नाभोग्यांशादृष्टिरुच्यतेनाअथास्मिन्गणितेस्थानदृष्टिविनापियहाणांदृष्टिरायाति अत्रदृशेभोग्यः५।१५ दृश्यंद्वः ५ अधोभयोर्यद्यपिषष्ठाष्टमस्थानदृष्टिर्नास्तितथापिपूर्वोक्तगणितेनागतादृष्टिफला २० नवमदृश्यमाणेत्थंशादियोगेवर्षेशविचारेस्या॥ अथचयोभावः॥ स्वामिसोम्याभ्यांदृष्टेयुक्तेयर्मेनैर्धे इत्यादिभावविचारेपिस्थानदृष्टेः प्रामाण्यंगणितागतदृष्टेर्वेतिसंशयनिवारणार्थंयथाभयोरैक्यंभवतिनथागणितमुक्तंमुक्तावल्यांदृष्टेनदृश्येदशदृग्भ १० तुल्योभागाश्चोनेत्र २०हतेतिथिभिः १५ यंके ३।९ खरामेभ्य ०।३१ इभाब्धि भेतु ८।१४ विघ्नविहृत्यात्तमिषुश्रुतिभ्यः ४५ खनर्क ६० शशिप्रमितेहिनिघ्नवियद्वसव्यो ६० भवतीदृष्टिः श्रुतिदृ ४। १। निघ्नविलवोहिदृग्भे २।१० खार्श्वी ४ रंकेभ्यः १० स्मरसिंहशास्त्रादिति अवतृतीयेकादृश्यादृक्दृष्टिस्थानेषवदृष्टिगणितमुक्तं नान्यस्थानेपुनर्यापिशास्त्रादाकृक्दृष्टेः प्रारंभः राशेर्नवचरसंज्ञः एवंस्थानदृष्टिगणितागतदृश्यो रेस्थानवर्ज्यज्योतिर्विदस्तमेवदृष्टिगणितंयुक्तिसहमालोक्ययामः॥ अथदृक्खेचरानयनमुक्तंतत्रिकालंकारे॥ स्वयाधिष्ठितभादृग्यावधिर्यावान्कादिर्लंकोदयान् संयोज्यात्तमिनःफलंखशाशिभिः १० सोकादिदृक्खेचरः युक्तोभैर्नवभिःसशेषरहितंयात्स्वदेशोदयान्नैकीकृत्यपुनस्तथैवखचरः साध्यांशपूर्वीबुधैः यस्यांशोगदलंनयो-

१	२	३	४	७	८	९	६	२	१०	दृष्टान्तिनदृश्यवाः॥
१	१	१	१	३	३	२	२	४	१	भागगुणकाःस्युः॥
२	२	१	१	२	२	१	१	३	३	भाजकाभवंति ॥
१५	१५	३०	३०	४५	६०	६०	४०	१०		दात्यफलमिदं ॥

समभवतिस्पष्टोयदृष्टियदृग्न्युत्क्रमागमितालब्धायदिनदादृष्टिस्फुटासोच्यतेयंदृग्गुणतिथिशकाभाक्फलं पूर्णसतीधीमतांकेषांचिन्मनसीदृशंदृशिमयास्वेचारिणांभाषितंयादृशः एवंदृग्यारंनरभागकोश्चदीप्तांशुकुभ्यायदियागकार्यं यागतथामितथंयदिवाद्यःनिष्टं यहाबद्दृग्लेकिलवक्ष्यमाणमिति ॥ अथ ॥ दृष्टिगणितविशेषानेशमिश्रोक्तः दृश्यस्यदृष्टारहितस्य भागागतेदुन १८ श्चेदधिकाःस्वशमात्रशोध्याः पुनस्तेरविनो १२ विशोध्याः स्वरीक्षभागादधबाधिशोध्याः नवहिशद्भांतिनदानदृश्यायुक्तोदृक्स्थानकलाविनिघ्नाः दिवाकरे १२ दीप्तलवैः क्रमेणभक्ताः स्फुटादृष्टिकलाभवंतिदृनि ॥ यहदृष्टिप्रयोजनमाहवामनः ॥ फलंदृष्टिप्रधानत्वान्मेषीचक्रस्यपूर्वदृष्टयाहितासत्रावसरप्राप्तंमेषीचक्रमुच्यते तत्रमेषीचक्रंचतुर्विधं एकंवैदृष्टियज्ञनमिश्रसमशुक्रूपमद्वितीयंदृष्टियज्ञोनाधिमित्रमित्रशत्रुसमाधिशत्रुरूपं तृतीयंदृष्टियज्ञनमित्रसमशत्रुरूपं चतुर्थंदृष्टियज्ञेवैनियतमित्रशत्रुरूपं तत्रप्रथममेषेभौमेऽादिसहितंमेषीचक्रंरामकृतानिके मित्रंतृतीयपंचमनवमेभादज्ञ ३।५।९।११। गतोपियोयस्यधनरिपुमृतिरिःक्षुच २।६।८।१२ समोयहःस्यादितिस्वेशत्रुरूपेकतुर्थेजायास्थानेतदादृशमे १।४।७।१० तात्कालिकस्पष्टज्ञमनेनेतादृक्षधिनमस्माभिरिनिहीनयंशेषबलोपयुक्तंपंचधामेऽादियुनंमेषीचक्रंमुक्त्वाचरांशः प्रत्यक्षमत्रदृष्टि ९।५ फलदोज्ञेयोधिमित्रादिभोयुक्तस्वेहदृशा ३।११। यपश्यतिचरांशंमित्रस्थेमेस्मृतःनेवालोकयतीहृ २।६।८।१२ यः सतुसमोयोयुक्ततोज्ञेयदृक् ४।१० दृशाशत्रुरधिशत्रुरिपुः प्रत्यक्षदोज्ञन्यदृक् १।७ इति तृतीयंमित्रशत्रुरूपंमेषीचक्रमुक्तंत्रेव दृशानिष्टक्षकोक्षेटोनेक्षकोक्षभाशुभो यहाभिरिपुज्ञयोस्वदृष्ट्यानाशुभानदृनिचतुर्थेनियतमित्रशत्रुरूपंद्विधिधंमेषीचक्रमुक्तंनाविकसारे मित्रण्यारज्ञाशांकशुक्रसचिवाः भौमार्कदेवार्चिनाःज्ञीवार्कक्षणधिषाः

ज्ञानिसितौचंद्रार्कभूनंदनाः॥सोम्यादित्यभुवोज्ञशांकजसितोमंदज्ञशुक्राइमे॥ सूर्यात्स्थूरिपवस्तुनाजिकनेमंशोधायपैश्चोदिना॥एषांसर्वेषांचक्राणांयथासंप्रदायंव्यवस्थाइत्युच्यते॥ मेषीचक्रप्रयोजनंवक्ष्यमाणपंचवर्गीयलक्षेयमिति॥तद्येसर्वेषकटीमधिष्यति ॥ अथपंचवर्गीयलंतत्प्रयोजनमाह ॥ यादवस्मृतिः बलविद्यापकालानांपंचवर्गीयलंविनानभवदनांवक्ष्यामिपंचवर्ग्याः प्रसाधनमिति ॥ तात्कालकालकारोपि ॥ वीर्यज्ञानेवर्षनाथप्रसिद्धेकर्तुंशक्यानेवयस्मात्समासुज्ञातुंवीर्यसूर्यतः सेचरांणांतस्माद्दृश्यंपंचवर्गाविधानमिति पंचवर्गीनाद्दमसारसिंहः स्वयंहस्वोच्चहृद्वेशराशिकमथमुग्रहद्वेनेति पंचवर्गाधिकारंविनाधिकारंयद्दानबलीति ॥ तदर्थंग्रहेज्ञानाहवामनः ॥ भौमशुक्रज्ञचंद्रार्कबुधशुक्रकारमंत्रिणः सांवि: शनिब्रह्मजीवोमेषादीनामधीश्वराइति ॥ अथयहाणांउच्चनीचराशीन्नरपरमाह्यज्ञानयनमाहयादवः ॥ मेषोवृषोथमकरोमृगदृक्कुलीरोमीनसुलादिनषपूर्वखगोत्रकानि आज्ञा १० पि ३ पिंड २८ तिथि १५ वायु ५ भ २७ विंश २० तुल्याऋक्षांशकाःस्वमदरगाश्चभवंतिनीचादृनि राशियुद्वहेज्ञाः संज्ञानंचेमथंयनर्कोष्टशरघुभागानीवास्फुजितारज्ञेश्वराणां रथदृष्टपंणागजरामलोज्ञाः शुक्रज्ञजीवार्कफुजेशहृद्दाः युग्मेषडंगेघुनगांगभागाः बुधास्फुजितीक्षेकुनार्किहृद्दाः कर्केनगांगांगनगाब्धिभागाः कुजास्फुजितेज्यज्ञेश्वराणां सिंहेगभूनाद्रिसांगभागादेवेज्यशुक्रार्किबुधारहृद्दाः स्थियांनगोज्ञाब्धिनगाक्षिभागाः सोम्यज्ञजीवकुनार्किनाथाः तुलेरसाश्वाद्रिनगाक्षिभागाः कोणज्ञजीवास्फुजितारनाथाः कीटेनगाब्ध्यष्टयुगश्रुतीनांसोम्येज्यशुक्रार्किकुजेशहृद्दाः४ शरांगभागाः भामारयुर्जिज्येज्यज्ञेश्वराणां चापेरविर्षंबुधिपंचवेदाःजीवाब्दजिज्ञारसनंश्वराणां मृगेनगाब्ध्यष्ट ४ शीध० पंक्षी ३ कुभेनगांगाद्विशरेषुभागांशशुक्रकजीवारज्ञनंश्वराणां मीनेर्कयंदालनंदपक्षाः सितेज्यसोम्यारज्ञेश्वराणां ॥ अथयेराशिकेज्ञाउक्तास्तात्कालिकालंकारे ॥ ॥ मषभोमार्कशुक्राविदधिपुज्ञाद्याः स्युर्यथे

युग्मराश्योर्देवेऽयक्ष्मानमूर्यासिनबुधशाशिनः कर्कटेसंप्रदिष्टाः सिंहेमंदेऽत्यभामारविसिनशाशिजाः स्युर्बुधस्यांतृतीयां
चंद्राकीज्यानलधालोकुजरविकवयोद्वेदुमंदाश्चरोपे॥मकरेगुरुभौमपश्चिमीशाः सितविचंद्रमसोघटेमिरुक्ताः यानिधा
कपतिभूमिजानुमीनकथिताः स्वदृणकैर्दक्षाणनाथाइति वेराशिकेश्वरालाघवनाक्ताः॥ संज्ञानंवेऽपि आशाः कुजारा
रविनोपिमध्यमाः सिनातृनीयाः कियनोदक्षाणपाइति॥ अथमुशस्हृद्दाउक्तास्तानिकरनमालार्थं॥ मुशस्हृद्दास्याः
क्रियनकतृकुलीरपूर्वाः क्रियपूर्वकाणामिति एतत्स्मृतं यादवस्मरिः अथनुर्हृदयोतमुखाः स्मृनास्वलिकुलीरदाणा
श्वकुलीरनः घटमुखघटयुग्मघटमनाः मृगवृषणदशामकरादयइति॥ तानिकभूषणतानिकालंकारामुशस्हृ
हेशाअन्यथेचोक्ताः॥ रवीज्यमंदाः सितचंद्रभौमाः यानिज्ञजीवाः कविभोमचंद्राः मुशस्हृद्दशाअनतोमृगेशा
धनुर्धरादन्हिशिनिद्दयोरिति नेनद्दस्यमूयतः समरसिंहेनेतवर्षज्ञानिर्णयार्थं वेराशिकेश्वराउक्तानतुमुशस्हृद्दे
दैशाः मेषादिचतुरस्रेशाशिकेश्वरावर्षेशार्थंमेवत्युक्तंज्ञानंवे वर्षेशार्थं दिननिशाविभागोक्तास्त्रिराशिपाइति त
स्मादत्रपूर्वोक्तानवांशशाश्चमुशस्हृद्दशा॥उक्तंचसुधानिधौ॥ मुशस्हृद्दनवांशंचकथितंनाजिकेमनेइति

॥अथद्दक्षाणचक्रमिदं॥											
१	२	३	४	५	६	७	८	९	१०	११	१२
मं	बु	गु	शु	श	र	चं	मं	बु	गु	शु	श
र	चं	मं	बु	गु	शु	श	र	चं	मं	बु	गु
शु	श	र	चं	मं	बु	गु	शु	श	र	चं	मं

१	२	३	४	५	६	७	८	९	१०	११	१२	राशयः
शु ६	शु ६	बु ६	मं ६	गु ६	बु ६	श ६	मं ६	गु ६	बु ६	शु ६	गु ६	हदस्वामिनः
रु ८	बु ८	रु ८	रु ८	शु ८	शु ८	रु ८	रु ८	बु ८	शु ८	बु ८	बु ८	हदस्वामिनः
बु ८	गु ८	बु ८	बु ८	श ८	गु ८	बु ८	बु ८	बु ८	गु ८	बु ८	रु ८	हदस्वामिनः
गु ८	मं ८	गु ८	गु ८	मं ८	श ८	गु ८	गु ८	मं ८	श ८	मं ८	श ८	हदस्वामिनः

नाजिकतिलकेपि॥ मुशस्हृद्दे शाश्चनवांशनाथाः मेषाः
सदासिंहकरोमकाश्चेतिति॥ नाजिकमुक्तावल्यामपि॥ मुशस्हृद्दे ज्ञानवर्गांशेपान्थे जयुर्ननेसिंहकशास्त्रविदा इति॥

अथपंचवर्गाफलमुक्तं यादवेन॥ स्वकीयगेहादिभवाद्यभा स्यात्सापारिजाताविपरीतभावाः मित्रारिजामध्यफलंपुनर्यो
विशंपरीयातिवनंब्रुवंहं॥ अथपूर्वग्रहबलसाधनार्थं स्थानान्युक्तानि॥ इदानींकस्मिन्स्थानेकियद्बलमुक्तंग्रहसाधनेषु
विंशन्सभे ३०विंशतिः २० रुद्रांगेस्यात्तिथिः स्वद्दहे दक्षाकंदक्षाणेनवांशकेपंचभवंनशीति एवंयुगाशाश्चविशेषका
स्त्रयोऽपि॥ अथमित्रसमशत्रुरूपेमेवीचकेबलविभागाउक्ताः॥ संज्ञानंवे॥ स्वस्वाधिकारांशकबलंसुहृद्दे पादोनमर्ध
समभेरिभेंधिः एवंसमानीयबलंनदेयंवेदोधृतेहीनबलः शरोनइति॥ उच्चबलानयनमुक्तंवासनेन॥ नीचोनीनोयद्रूपद्वाधिकोमंडलशोधितः शेषस्यांशानंदभक्तावलमुच्चस्थनायनइति अथमित्राधिमित्रसमशत्रुरूपे
धिशत्रुरूपेमेवीचकेबलविभागाउक्ताः॥ नाजिकतिलके॥ उक्ताः कलाः स्वर्क्षगनेग्रहेद्दे प्रत्येकवर्गत्वधिमित्रगेहे स्वां
श्यज्ञहीनाहिनगेहमंस्थे स्वार्धोनितास्वांघ्रिबलक्षयोनासमर्क्षगेशत्रुयहोपयातेनिजांशुसाम्यप्रमितंबलंस्यात्॥
अथहिपड्डेपगतेस्वकीय॥नृपांशकाप्तिता इतिवर्गशेर्यं यथागतेतुंगबलंतुनेनसमन्वितंवर्गबलंबलंस्यात्॥ मित्रशा
त्रुरूपेमेवीचकेबलमुक्तंपड्डतौ॥ मित्रमित्रारिमेत्रिंशा ३० मिश्राः ५५ साद्धा ७।३० द्वयोश्चकंद्दतुनद्दलंच्यंशाद्दे क्षाणे

अथविधामेवीचबलचक्रवा॰४॥																								
यहव	म	मि	सम	शत्रु		स्व		मि		सम		शत्रु												
दहस्व	३०	२२ ३१	१५ ०	७ ३०	स्व	३० ०	२२ ३१	७ ०	१५ ०	८ ३०	३ २२	१ १५	० ७											
दंका	१५ ०	११ १५	८ ३०	३ २२	मि	१५ ०	११ १५	८ ३०	७ ०	३ २२	१ ११	० ८												
सुसहृ	१० ०	७ ३०	५ ०	२ ३०	सम	१० ०	७ ३०	५ ०	३ ३०	२ ०	१ १५	० ३०												
	५ ०	३ २२	२ ३०	१ १५	शत्रु	५ ०	३ २२	२ ३०	१ १५	१ ०	० ३०	० १५												

शत्रुमित्ररूपमेवीचकेबलचक्रं॥																								

ऊनाः शत्रुभेषादोनाः ३।४५ स्वगुणांशकैर्दशलवाः १० भाणांशकाभिश्चेष्टैष्काणसदलाथमा २।३० स्वरिगतैर्नवांश
कैस्वेशराः ५ नवांशेनिनभिश्चगेयमलभाः सार्द्धस्वरेण हृतमिति तदैक्यनुर्यभागप्रमाणकाबलोन्मितिः दशाधिकेष
लेबलीशराख्यकेत्यवीर्यकइति अथशामनेनलग्नस्यापिपंचवर्गीकार्यमुक्तं॥स्वांशेननवांशकैर्हृतायदृष्टैष्काणएव
च सलग्नस्वचराणांतुभोक्तेयंपंचवर्गीकेति॥ अथवर्षदशाद्यानयनेदशाबलादिनिर्णायार्थंविशोपकविभागेननष्टग्र
हादिस्फुटमुक्तंनाडिकसारे॥ भाणेनष्टबलोग्रहोदशामितेर्मध्योविशोपैः १० तथाश्वेशोपञ्चभिर्नैः १५ सुखार्थ
जनकः प्रोक्तः खदलैर्भयेदिति॥ननुविंशतिविंशोपकात्मकंबलंस्यापिग्रहस्यनायातिनचाहि॥ मेषस्थसूर्य
स्योच्चबलादियद्यपिसमायातितथापिस्वगृहत्वाभावान्मित्रसमशत्रुगृहादिभेदरूपबलतारतम्येनायत्व
न्यूनतासार्द्धद्व्यविंशोपकमितंभवत्येव॰ एवंसतिसार्द्धाःसप्तदशविंशोपकाबलं॥सिंहस्थसूर्यस्यस्वगृह
बलंयद्यपिसमायातिनथाप्युच्चराशेरभावादुच्चबलस्यन्यूनतायांषोडशविंशोपकाबलंस्यान्नतुविंशतिविंशो
पकात्मकं अथवृश्चस्यकन्यायांपंचदशांशेस्वगृहबलंस्योच्चेयद्यपिपूर्णंसमायातितथापिहद्रेष्काणनवांश
बलानिपूर्णानिनसंभवंति॥यतःआदिमाःषडंशाःकन्यायांवृश्चहद्रा॥अंतिमाश्चिभागेवृश्चद्रेष्काणःअंतिमसं
ज्ञश्चयंनवांशःयदिकन्यांतिमनवांशोगृह्यतेतदास्वगृहद्रेष्काणस्यनवांशबलानिसंपूर्णन्यायांतिपरस्वकंसंधि
त्सतोःपरंप्रच्यवते॥इतिन्यायादुच्चबलंकिंचिदूनहद्रादिबलमपिमित्रादिगृहेशखान्यूनमतःपरमबलंयथा
कथंचिदष्टादशविंशोपकात्मकंबलंस्यान्नविंशतिविंशोपकैरात्मकंबलंस्वस्वगृहोच्चयोर्नेतरैर्द्विशा
तिविंशोपकन्यूनमेवबलंस्यात्अथकेचित्पंचवर्गीहादशवर्गीहर्यस्थानबलानामेक्येभक्तंयदिविंशतिविंशो
पकमितंस्यात्तदापूर्णग्रहोबलीस्यैर्यः॥ उक्तंचयादवेन॥ श्रीसूर्यवर्गीकिलपंचवर्गीस्थानोत्थवीर्येध्यमथापि
भक्तं चेद्विंशतिः पूर्णबलोग्रहः स्याद्बलानुमानेनचमध्यमादिरित्यलमितिप्रसंगेन॥ अथदशाफलज्ञानार्थंपंचवि

DR. BHAU DAJI
डॉक्टर भाऊदाजी लाड आर्यसमाज संग्रहालय
MEMORIAL

शकफलज्ञानार्थंषड्विंशोपकानिष्टैरात्मकबलोहीनबलः षड्विंशोपकाधिकबलोमध्यबलः द्वादशविंशोपकात्मकबलः पूर्ण
बलः एतत्स्पष्टमुक्तंहिल्लाजेनपंचविंशोपकान्यूनबलोनष्टबलोग्रहः पंचविंशोपकबलोहीनवीर्यः प्रकीर्तितः पंचाधिकब
लोमध्यबलः संपूर्णवीर्यकः दशाधिकबलोदेशफलंसेवंविभागतः॥ इतिसामान्यपंचवर्गीबलंसाधनं॥ अथवय
स्तरयुनखिदकादिसमरसिंहादिसंमतं॥ स्थानादिकालनिर्मुक्तंचेष्टाबलनिरूप्यते उक्तंचसमरसिंहेन सामान्य
बलमिहाक्तं विशेषमथवोक्ष्यफलमूह्यमितिनवस्थानबलंसविशेषपंचवर्गीचक्रंसूचनमुक्तं कुर्थयोगसमरसिंहे
न सबलीस्वगृहेवेशादिकहोराद्रेष्कणमुशत्फलहेथुगतखेटैरिति एतत्स्पष्टंगणितपूर्वमुक्तं॥ तानिकमुक्तावक्ष्यं॥ स्थाधिष्ण
होतर्कचेदापिनेवरूपाद्यनिस्युर्गृहिकेंद्रिधनानि तुंगवदाख्यश्चिनसादर्धहद्रेशगताद्धोनसार्धान्यतः स्युः त्रैराश्युधहोनस
धार्धकानिवेशत्यर्धस्थान्मुशत्फलसंज्ञेयहस्तेषुरातिपुहादशांशाः गेहारंगाख्यमयोख्यपिदस्याः रामाश्चत्वारिनवचं
द्राईकानिचंद्राईकानिचंद्राईशरूपपूर्वाः क्रमेणखेटेशहृतेसप्तभास्तादिगेहाद्धपेभार्हुन्यभक्तस्योनुपातः अ
भिन्नादियहादिभ्योबलंयदिहस्तांधिनंतत्रहृतमानविभक्तंस्फुटंभवेदिति अत्रतर्कचेदार्थकानिहादशो
क्तानिरूपकबलंभवति अथात्रस्वगृहेपूर्णबलंदुरफेस्वगृहेनग ७ भगइत्युक्तेः स्वगृहात्सप्तमेराशेगृहोनि
र्णयः अंतरेविराशिकमुशत्फलसंज्ञेयं तत्रार्कचंद्रयोरेकमेकंस्वगृहमनोनसंदिग्धं भौमादीनांनुस्वगृहहृद्यसद्भा
वात्सप्तमस्थापिहेविधात्कथमशबलानयनोपायउच्यते॥भौमादिचारवशान्निजकास्थितमेवस्वगृहंनानुद्दि
स्थितमिति संप्रदायसुक्तिरिति अथगृहः स्वगृहसप्तमाद्दिशोध्यशेषंषडधिकंचेद्दादशकृद्धोचेद्यथास्थित
मेवस्थाप्यं ततस्तस्यांशाः षड्भक्ताः कलादिबलंस्यादिति॥ अत्रोपपत्तिः॥ स्वगृहप्रारंभेपूर्णविंशत्यात्मकं
बलंतत्सप्तमारंभेशून्यं अतोनुपातः यदिराशिषट्कांशैः १८० पूर्णबलं ३० लभ्यतेतदेष्टनक्षिमिति अत्र
गुणहारयोस्त्रिंशताः पर्वतेऽतेगुणस्थानेरूपंभाजकस्थानेषडित्युपपन्नं एवमधिमित्रगृहस्थगृहेपूर्णबलं

पंचधामैत्यादलविभागचक्रं

	यह	उच्च	हृद्य	वैरि	मु.
सवर्गो	६	४	३	२	१
मित्रवर्गो	४	३	२	१	॥
मित्रगृ	३	२	१	॥	०
शत्रुगृ	२	१	॥	०	॥
शत्रुवर्गो	१	॥	०		
अतिशत्रुगृ	॥	०	०	०	०

द्विधामधीचकेबलचक्रं

	यह	उ०	हृ०	वै०	मु०
स्वगृहे	६	४	२	२	१
मित्रगृहे	४	२	२	१	॥
शत्रुगृहे	२	२	१	॥	०

एतत्स्फुटीकरणविधिरुच्यते

२१ अधिमित्रगृहात्सप्तमे शून्यं तत्राधिमित्रस्य गृहस्थं गृहं अधिमित्रसप्तमगृहाद्विगो ध्रुवशर्पगृहधिकं हृद्राशक्रुं नौचेद्यथास्थितस्यांशाः नवभक्ताः कलादि स्वाधिमित्रगृहबलं स्यात् ॥ अत्रोपपत्तिरनुपातेन ॥ यदि राशिपट्कांकैः १८० पूर्णबलं २१ तदेष्टेनकिमिति अत्रनुपातेन द्वाविंशतिभिरुपपर्वभिरुक्तेनगुणस्थानेरूपभाजकेन यद्दत्युपपन्नं एवंगृहबलेस्वस्वपरमबलेन स्वस्वसप्तमपर्यन्तेन चपूर्ववदनुपातयुक्त्या सोपपत्तिकं बलं साध्यं स्वोच्चबलं त्वनुपातेनमागानीतमेव अधिमित्रायुक्तेउक्तवदनुपातेनबलं साध्यं उच्चराश्यर्धशेषं बलमवकर्तव्यं अथहृद्दे ष्काणनवांशानां सप्तमनैर्वश्यमितिवचनाभावादंशैरेवानुपातः तत्र थाद्रेष्काणप्रारंभैकलोपचयः पंचभांशाः समासोपूर्णबलं १० दृशांशसमासोधरन्ध्रबलं० तत्रगृहविरामानेद्रेष्काणमुक्तभोग्ययोरल्पसंज्ञादिद्विगुणकलादिबलस्यात् ॥ अत्रोपपत्तिः ॥ यदिपंचभिरंशैर्दशकलामितंबलंनरैरेकनकिं अत्रपंचभिरुपपर्वभिर्लब्धनेष्टस्थानेद्वयमित्युपपन्नं एवमनुपातेनाधिमित्रादिद्रेष्काणबलं साध्यं एवंस्वादिनवांशेस्वादिहृद्दृश्यानत्रद्रेशैरनुपातात्फलंलब्धं तत्रहृद्दृश्यांपरमबलंकलाः १५ मुक्तशेषहेपरमबलंकलाः एवं सर्वबलेक्ष्यं ग्रहोपरि अन्येषांग्रहाणांदृश्यः समागतासद्रेष्केणगुणितं६० भक्तंस्फुटंस्यात् एवंसविशेषपंचवर्गिचक्रनिरूपणानंतरं अन्यस्थानबलमुक्तं ॥ तत्रबलमरसिंहेन ॥ योलग्नेकेंद्रेवातन्निकटेवाथवीक्षतेलग्नं पुरुषागगनाद्यावतृतीयभवनेस्त्रियोषिनवमांनं पुंसवेदाः पुंराशौस्त्रीराशौग्रहाबलिनः स्थिरराशौवाभवंतिनेबलिनइति एतत्स्पष्टंगणितपूर्वकमुक्तं मुक्ताथवात्मांशपंकेंद्रेनदुपस्थितग्रहरूपका

